

SREE CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY
* FORT, BANGALORE *



LIBRARY
FORT, BANGALORE

SASTHRAMUKTHAVALI-9.

PURUSHA SUKTHA BHASHYAM.

BY

P. B. ANANTHA CHARIAR. Pandit.

EDITOR OF

Sasthramukthavli And Manjubhashini.

PRINTED AT THE

SRI SUDARSANA PRESS.

CONJEEVERAM.

1901

Price Re 1.

शास्त्रमुक्तावळी - ९

पुरुषसूक्तभाष्यम् ।

शास्त्रमुक्तावळ्या मञ्जुभाषिण्याश्च

सम्पादकेन

श्रीकांची प्रतिवादिभयंकरम् अनन्ताचार्येण

विरचितम् संशोधितश्च

श्रीसुदर्शनमुद्राक्षरशालायाम्

अमुद्यत ।

॥ श्रीकांची ॥

१९०१

इदानी मेतन्मूल्यम् १ - ० - ०

श्रियै नमः ।

श्रीहयग्रीवाय नमः ।

भूमिका ।

इह किल श्रवणस्मरणजपाध्ययनादिना सर्वपुरुषार्थसार्थसाधनीभूतं, सर्वदेश सर्वबुधजनसमाद्रियमाणं, त्रिषु वेदेषु पठ्यमान मिदं पुरुषसूक्तं सकल वेदसारभूत मिति सुविदित मेत द्विदुषाम् । तथाचोक्तम् –

" वेदेषु पौरुषं सूक्तं पुराणेषु च वैष्णवम् ।
भारते भगवद्गीता धर्मशास्त्रेषु मानवम् ॥ " इति ।

तदिदं तत्वहित पुरुषार्थप्रतिपादनैकान्तं पुरुषसूक्तं बहुभि र्बहुशा व्याख्यातमपि तेषा मतिसंक्षेपविस्तरौ गहनांच लेखनप्रणाळीं पर्यालोच्य नातिसंक्षेपविस्तरं सरळयाच सरण्या कस्यचि द्व्याख्यानस्य विलेखने सुहृद्भिः प्रोत्साहितोह मुपलब्धेभ्यो व्याख्यानेभ्य स्संगृह्य संग्राह्या नर्था नन्यतश्चावश्य कान् यथामति व्यलिख मिदं व्याख्यानम् । अत्रच मानुष्यकसुलभेना नव-धानेन मतिमान्द्येना न्येनवा हेतुना सम्भाविता न्मदीयान् दोषान्, अथच मुद्रणसमये मुद्रणाधिकृतानवधानादिनिबन्धनान् मुद्रादोषांश्च, स्वभावेन सहजेन-पश्यन्तो गृह्णन्तश्च गुणानेव केवल मनुगृह्णीयु स्सन्तो जन ममु मित्यभ्यर्थ-यामहे । अथचा वश्यपरिहरणीयान् दोषान् सूचयेयु र्येन द्वितीयसंस्क-रणे ते परिहृता भवेयु रिति निवेदयामश्च सहस्रश स्तान् । इति

श्रीकांची प्रतिवादिभयंकरं अनन्ताचार्यः,

सम्पादकः – शास्त्रमुक्तावली मञ्जुभाषिण्योः ।

श्रियै नमः ।

श्रीहयग्रीवाय नमः ।

पुरुषसूक्तं ताव दृष्टादशर्चं " सहस्रशीर्षा पुरुषः " इत्यारभ्य " यत्र पूर्वे साध्या स्सन्ति देवाः । " इत्यन्तं तैत्तिरीये पठ्यते ।

अस्य श्रीपुरुषसूक्तमहामन्त्रस्य नारायणऋषिः । अनुष्टुप्छन्दः । भगवान् वासुदेवः पुरुषो देवता ।

प्रथमा मृचं मूर्ध्नि न्यसेत् । द्वितीयां फाले । तृतीयाचतुर्थ्यौ नयनयोः । पंचमीषष्ठ्यौ नासिकारन्ध्रयोः । सप्तमीं मुखे । अष्टमीं गळे । नवमीदशम्यौ बाह्वोः । एकादशीं हृदये । द्वादशीं नाभौ । त्रयोदशी मंगे । चतुर्दशीं मेहने । पंचदशीषोडश्या वूर्वोः । सप्तदश्यष्टादश्यौ चरणयोः । इति न्यासः ॥

अथाराधने विनियोगः पाद्मे यथा -

" आद्यया वाहये द्देव मासनंच द्वितीयया ।
पाद्यं तृतीयया ध्यंच चतुर्थ्या वितरे द्द्वा ॥
पंचम्याचमनं स्नानं षष्ठ्या सप्तऋचाम्बरम् ।
उपवीत मृचाष्टम्या नवम्या गन्धलेपनम् ॥
पुष्पं दशम्यैकादश्या द्वादश्या धूपदीपकौ ।
निवेदनं त्रयोदश्या चतुर्दश्या नमस्कृतिः ॥
प्रदक्षिणं पञ्चदश्या षोडश्योद्वासनं हरेः । " इति ।

अधिक मन्यत्रानुसन्धेयम् ।

इति

प्र - अनन्ताचार्यः ।

सम्पादकः

विषयानुक्रमः ।

विषयाः-	पृष्ठानि

शास्त्रमुक्तावळी ।

पुरुषसूक्तभाष्यम् ।

॥ श्रीहयग्रीवायनमः ॥

श्रीमतेरामानुजायनमः ।

मुररिपुचरणसरोरुहमभिवन्द्य यतीश्वरांघ्रिपद्मञ्च ।
पुंसूक्तार्थान्बहुशः पूर्वैरुक्तान्लिखामिसंक्षेपात् ॥

इहखलु दुरन्तदुस्तरसंसारपारावारनिमग्नान् तापत्रयाभितप्तान् सुरनरतिर्यक्स्थावरादिभेदभिन्नानखिलानपि जन्तूनुद्धिधीर्षुभ्यां परमकारुणिकाभ्यां श्रीश्रीपतिभ्यां सकलजगदुद्धरणोपायान्वेषणपराभ्या मतिमहदगाधशब्दब्रह्मपयोधिमथनेन संपादितं दध्नइव घृतं सकलश्रुतिनिकरस्य सारभूतं सूक्तद्वयम् । तथाचोक्तं लक्ष्मीतन्त्रे – देवो नारायणो नाम जगतस्तस्थुषस्पतिः । " इत्यारभ्य " तावावां परमेव्योम्नि पितरौ जगतः परौ । अनुग्रहाय लोकानां स्थितौ स्वः परया श्रिया ॥ कदाचित्कृपयाविष्टौ जीवानां हितकाम्यया । सुखिनस्स्युरिमे जीवाः प्राप्नुयुर्नौ कथं त्विति ॥ उपायान्वेषणे यत्तौ परमेण समाधिना । मथ्नावस्त्वतिगंभीरंशब्दब्रह्ममहोदधिम् ॥ मथ्यमानात्ततस्तस्मात्सामर्ग्यजुषसंकुलात् । तत्सूक्तमिथुनं दिव्यं दध्नो घृतमिवोत्थितम् ॥ " इत्यन्तम् । तत्रचादिमं पौरुषं सूक्तं ऋग्वेदे - अष्टमाष्टके चतुर्थाध्याये सप्तदशवर्गे षोडशर्चतया, यजुषि तैत्तरीयकेऽष्टादशर्चतया, वाजसनेयके षोडशर्चतया, सामवेदेऽथर्वणेच किञ्चिन्न्यूनाधिकभावेन, पठितम् । ततश्च तत्तद्वेदघटकतत्वप्रतिपादकवाक्यानान्तरवनिर्णयांशे उपयुक्तं सर्वोत्तमञ्च । आहच व्यासः

“ इदं पुरुषसूक्तंहि सर्ववेदेषु पठ्यते। ऋतं सत्यञ्च विख्यातमृषिसिंहेन चिन्तितम् ॥ ” इति । ... ...

एवं पूर्वोदाहृतलक्ष्मीतन्त्रवचनैरन्यैश्चास्य सकलवेदसारतमत्वं लभ्यते । अतएव विष्णुस्मृतौ संध्यावन्दनादिकालेषु गायत्र्यासहानुसंधेयत्वं सर्वोत्तमत्वञ्च प्रत्यपादि - “ विशेषतस्सावित्रीमवश्यं जपेत्पुरुषसूक्तञ्च, नैताभ्यां सदृशमस्ति ” इति । अतएवच, पाद्मे - “ वेदेषु पौरुषं सूक्तं पुराणेषुच वैष्णवं । भारते भगवद्गीता धर्मशास्त्रेषु मानवम् ” इति सर्ववेदोत्तमत्वं सकलवेदसारत्वञ्चास्य प्रतिपाद्य “ मन्वर्थविपरीतातु यास्मृतिस्सा नशस्यते ” इतिन्यायेन तत्वनिर्णयांशे एतदविरोधेनैव सकलश्रुतिस्मृत्यादीनां नेयत्वंमानवदृष्टान्तेनसूचितम् । ...

सकलवेदसारतयैवच ब्रह्मयज्ञेनैनैकेन पठितेन सकलवेदाध्ययनजन्यफलप्राप्तिरुद्घुष्यते विष्णुधर्मोत्तरे – “ ब्रह्मयज्ञे जपन् सूक्तं पुरुषंचिन्तयन् हरिम् । ससर्वान् जपते वेदान् साङ्गोपाङ्गान्विधानतः ॥ ” इति । अतएवच हेतोरहस्यप्रायश्चित्तप्रकरणे पुरुषसूक्तजपस्य सर्वपापनिवर्तकत्वमुक्तं यमेन – “ पौरुषं सूक्तमावर्त्य मुच्यते सर्वकिल्बिषात् । ” इति । सन्तिच बहूनि पुरुषसूक्तमाहात्म्यप्रतिपादकवचनानि, तान्यत्रविस्तरभयान्नलिख्यन्ते । ... ...

तदिदमपवर्गोपायभूतं सर्वोत्तमोत्तमं तत्वनिर्णायकं पुरुषसूक्तंश्रीमन्नारायणपरम् । तथाहि – पुरुषसूक्तमिति नामधेयादेव तावदस्य नारायणपरत्वं सुव्यक्तं । पुरुषशब्दोहि नारायणैकसाधारण इत्युत्तरत्र प्रपञ्चयिष्यते । ... ...

यत्तु कश्चिदाह- पुरुषो नारायणोस्य सूक्तस्य ऋषिः, तन्निबन्धनमेवचास्य पुरुषसूक्तमिति संज्ञा । दृश्यतेच तत्तद्दृष्टनामघटिता संज्ञा, यथा - काठकं कालापकमिति । नह्यत्रकठकलापादीनां देवतात्वं संभवति । इति । ... ...

तत्र -- छन्दोगानां सामविधानब्राह्मणे - “ एषावैष्णवी नाम संहितैतां प्रयुञ्जन्विष्णुं प्रीणाति ” इत्यत्र एषेत्यनेन संगृहीतस्य पुरुषव्रतपदपरामृष्टस्य पुरुषसूक्तस्य “ वैष्णवीतिसमाख्याप्रतिपादनेन विष्णुदेवताकत्वावश्यंभावात् । वैष्णवीत्यस्य “ सास्यदेवते ” तिविहितदे

वतार्थकतद्धितान्तत्वात् । “ एतांप्रयुञ्जन्विष्णुंप्रीणाति ” इति पुरुषसूक्तजपादिना विष्णुप्रीतिप्रतिपादनेन तस्य विष्णुदेवताकत्वमन्तरानुपपत्तेश्च । ... ...

नच वैष्णवीत्यत्र संबन्धसामान्ये विहिततद्धित एवास्त्विति वाच्यम् । तस्य विशेषपर्यवसानापेक्षत्वेन मन्थरप्रवृत्तिकतया निरपेक्षदेवतार्थकतद्धितापेक्षया दुर्बलत्वेनाप्रवृत्त्या देवतार्थकतद्धितान्तत्वस्यैव युक्तत्वात । संबन्धसामान्यतद्धिताङ्गीकारेपि पुरुषपदवाच्यस्य विष्णोरेव सूक्तस्तुत्यत्वेन तस्यैव देवतात्वावश्यकतया देवतात्वरूपपर्यवसितसंबन्धार्थकताया एव न्याय्यत्वात् । पूर्वोपदर्शितछान्दोग्यवचनेन विष्णुप्रीतेरेवपुरुषसूक्तजपादिफलतालाभेन विष्णोरेवतत्स्तुत्यत्वावश्यकत्वात् । तत्स्तुत्यार्थएव तद्देवताभावस्य सकलतान्त्रिकसम्मतत्वात् । “ यागसंप्रदानं देवता मन्त्रस्तुत्यश्चार्थः ” इतिकैयटोक्तेः, “ त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता मन्त्रस्तुत्याच ” इतिकौमुदीकारेण, “ कथमैन्द्रो मन्त्रः मन्त्रस्तुत्यापि देवतेत्युपचरन्ति ” इतिकाशिकाकारेणचोक्तेश्च । अत्र देवतार्थकत्वाभावे “ एषेति समानपदोपात्ते ” ‘ इदंविष्णु ’ रिति मन्त्रान्तरेपि तथात्वप्रसङ्गात् । अन्यथा एकत्र देवतार्थकतया पर्यवसानमन्यत्रान्यथेति वैरूप्यापत्तेश्च । ... ...

एवं नारायणसमाख्यापि पुरुषसूक्तस्य विष्णुदेवताकत्वं दृढयति । दृश्यतेच “नारायणाभ्यां ब्राह्मण एकोहितेतिचोपस्थानम्” “सहस्रशीर्षा पुरुष इत्युपहितां पुरुषेण नारायणेन यजमान उपतिष्ठते” “नारायणाभ्यामुपस्थानम्” “उत्तरेणनारायणेनादित्यमुपतिष्ठते” इतिच बोधायनापस्तंबभारद्वाजैरन्यैश्चबहुधास्य नारायणसमाख्यानिर्देशः कृतः । नारायणशब्दोहि “सास्यदेवता” इति विहितदेवतार्थकाणन्ततया निष्पन्नः पुरुषसूक्तस्य नारायणदेवताकत्वंस्पष्टयति । नच नारायणदृष्टत्वादेव नारायणसमाख्या सिद्धिः, “दृष्टं साम” इत्यस्य सामविषय एव प्रवृत्तेरन्यस्यचादर्शनात । ... ...

यत्वत्र “ अस्यपौरुषसूक्तस्य ऋषिर्नारायणः स्मृतः । छन्दस्त्वानुष्टुभं सूक्तन्तिस्रोन्यास्त्रिष्टुभोमताः ॥ परमव्योमवासीच पुरुषो देवता भवेत । ” इत्यादिषु नारायणादन्यस्य देवतात्वोक्तेर्नास्य विष्णुदेवताकत्व

मितिचोद्यम्, तत्र-पुरुषपदस्यापि नारायणसाधारणताया उत्तरत्र वक्ष्यमाणतया ऋषिदेवतयोरैक्यसिद्धेः । नारायणपुरुषपदाभ्यां ऋषिदेवतयोः प्रथङ्निर्देशस्य विधिवाक्यस्थदेवतावाचिशब्देनैव प्रयोगकालेपि देवतानिर्देशः कर्तव्यइत्येतादृशनियमनिबन्धनत्वात् । एतादृशनियमस्य च पूर्वमीमांसा दशमाध्याय चतुर्थपादस्थ " विधिशब्दस्यमन्त्रत्वे भावस्स्यात्तेनचोदना" इत्यधिकरणसिद्धत्वात् । तस्मात्पुरुषसूक्तस्य विष्णुदेवताकत्वं दुर्निवारमेव । ... ...

किञ्च-पुरुषसूक्तस्य भगवदाराधनादौ विनियोगादपि विष्णुदेवताकत्वम् सिद्ध्यति । तत्रतावत, बोधायनसूत्रे - विष्ण्वाराधनविधानानन्तरम् - "अथैनमृग्यजुस्सामभिस्स्तुवन्ति, सहस्राणीतिध्रुवसूक्तम् जपित्वा पुरुषसूक्त श्चान्यांश्च वैष्णवान् मन्त्रान् " इति, छन्दोगसामविधानब्राह्मणे – एषा वैष्णवी नाम संहितैतां प्रयुञ्जन्विष्णुम्प्रीणाति" इति, अथर्वणे गोपथब्राह्मणे अष्टादशमहाशान्तिप्रकरणे "वैष्णव्यां पुरुषसूक्तम् " इति, तथा शौनकस्मृतौ – "शौनकोहम् प्रवक्ष्यामि नित्यम् विष्ण्वर्चनम्परं "- इत्यनन्तरं - "आद्ययावाहयेद्देवमृचातु पुरुषोत्तमम्" इत्यारभ्य "षोडश्योद्वासनं कुर्यादेवमाराधयेद्धरिम्" इत्यन्तं, व्यासस्मृतौ- नविष्ण्वाराधनात्पुण्यम् विद्यते कर्मवैदिकं । तस्मादनादिमध्यांतं नित्यमाराधयेद्धरिं ॥ तद्विष्णोरितिमन्त्रेण सूक्तेन पुरुषेणतु । नैताभ्यां सदृशो मन्त्रो वेदषूक्तश्चतुर्ष्वपि" इति, विष्णुस्मृतौ - षट्षष्टितमाध्याये- "अथातस्सुस्नातः प्रक्षाळितपाणिपादः स्वाचान्तोदेवतार्चायां स्थण्डिलेवा भगवन्तमनादिनिधनम् वासुदेवमभ्यर्चयेत्" इत्यादिना भगवदर्चन विधानानन्तरम् " एवमभ्यर्च्यतु जपेत्सूक्तम् वै पौरुषन्ततः । तेनैव जुहुयादाज्यम् यइच्छेच्छाश्वतम् पदम् " इतिच, भगवदर्चनादिषु विनियुक्तंपौरुषसूक्तम् । अन्यान्यपि सन्ति वचनानिपाद्मादिसंहितासु विस्तरभयान्नलिख्यन्ते । तस्मात्पुरुषसूक्तस्य विष्णुदेवताकत्वं निराबाधमेवेतिसिद्धम् ॥ ... ...

तदीदृशमपवर्गसाधनभूतम् सकलवेदसारभूतम् भगवदेकान्तं पौरुषसूक्तम् पाठभेदेन सर्ववेदपठितमपि तैत्तिरीयपाठमनुसृत्य व्याख्यायते ।

प्रथमाऋक् ।

सहस्रशीर्षापुरुषः । सहस्राक्षस्सहस्रपात् ॥

सभूमिं विश्वतोवृत्वा । अत्यतिष्ठद्दशांगुळम् ॥ १ ॥

(सहस्रशीर्षा पुरुष इति ।) अत्र सहस्रशब्द आनन्त्यवचनः,"शतं सहस्रमयुतं सर्वमानन्त्यवाचकम् " इत्युक्तेः । आनन्त्यश्चापरिच्छिन्नत्वं । शीर्षशब्दश्चोत्तमांगवाची "शीर्षश्छन्दसि" इति शिरश्शब्दस्य शीर्षन्नादेशः । उत्तमांगवाचिना शिरश्शब्देन सर्वेन्द्रियाणि लक्ष्यन्ते , 'बोधन मनन श्रवण स्पर्शन दर्शनाशन रसन घ्राण ज्ञानानि श्रितानि भवन्त्यतश्शिरः' इति निरुक्तेः । ततश्च तत्कार्यभूतज्ञानशक्त्यादिकंलक्ष्यते । तथाचापरिच्छिन्नज्ञानशक्त्यादिमान्पुरुष इति फलितोर्थः । " परास्य शक्तिर्विविधैव श्रूयते " " स्वाभाविकी ज्ञानबलक्रियाच " " तेजोबलैश्वर्य महावबोध सुवीर्यशक्त्यादि गुणैकराशिः " इत्यादि परश्शत श्रुति स्मृतीतिहासपुराण वचन निकर सिद्धोयमर्थः । एतदेवोत्तरत्र " सहस्राक्ष " इत्यादिना प्रपञ्चयिष्यते । सहस्राणि शीर्षाणि यस्येतिवा विग्रहः । यथा सहस्रशिरस्कस्सहस्राक्षस्सहस्रपादश्च पुरुषोऽपरिमितज्ञानशक्त्यादिमान् भवति, तथायमपीति भावः । ... ...

केचित्तु "सहस्रशीर्षा' इत्यादेर्यथाश्रुत एवार्थः । तथाच सहस्रशिरस्कः सहस्रनेत्रवान् सहस्रपादवांश्चेत्यर्थः । उक्तंच भगवतस्सहस्रनेत्रत्वादिकम् -"सहस्रबाहूदरवक्त्रनेत्रम्" इति । अत्रच "सहस्राक्ष"इत्युपलक्षणम् पाण्यादीनां । यथाहगीतासु- " सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखम् " इति । मन्त्रश्च भवति--"विश्वतश्चक्षु रुतविश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् " इति । इत्याहुः । ... ...

पुरुषशब्दश्च सकलजगत्कारणभूतं नारायणमाह । तत्र सकलजगत्कारणत्वं " पूर्वमेवाहमिहासमिति, तत्पुरुषस्य पुरुषत्वं " इति श्रौतनिर्वचनादेव सिद्धं । तस्य नारायणत्वञ्च उत्तरनारायणे " वेदाहमेतं पुरुषं महान्तं " इति प्रस्तुतस्य पुरुषस्यैव " ह्रीश्चतेलक्ष्मीश्चपत्न्यौ "

इति लक्ष्मीपतित्वोक्त्या सिद्ध्यति । "सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम् । विश्वं नारायणं ज्ञेयमक्षरं परमं प्रभुम् ॥" इत्युत्तरनारायणे नारायणवृत्तितया प्रतिपादितस्य सहस्रशीर्षत्वादेरत्र प्रतिपादनाच्च पुरुषो नारायणएव । "पुंसंज्ञेतु शरीरेस्मिन् शयनात्पुरुषोहरिः । शकारस्य षकारोयं व्यत्ययेन प्रयुज्यते ॥ यद्वा पुरे शरीरेस्मिन्नास्ते स पुरुषो हरिः । यदिवा पुरवासीति पुरुषः प्रोच्यते हरिः । यदिवा पूर्वमेवासन्निहेति पुरुषं विदुः ॥ यदिवा बहुदानाद्वै विष्णुः पुरुष उच्यते । पूर्णत्वात्पुरुषोविष्णुः पुराणत्वाच्च शार्ङ्गिणः । पुराणभजनाच्चापि विष्णुः पुरुष ईर्यते ॥ यद्वा पुरुष शब्दोयं रूढ्या वक्ति जनार्दनम् " इत्यादिपाद्मगतनामनिर्वचनाध्यायीय वचनैरन्यैश्चैतादृशैः पूर्णत्वसकलजगत्कारणत्वादिविशिष्टनारायणत्वावच्छिन्ने पुरुषशब्दस्य योगरूढिरप्यवगम्यते । "ब्रह्माद्यास्सकला देवा यक्षतुंबुरुनारदाः । ते सर्वे पुरुषांशत्वादुच्यन्ते पुरुषा इति " इति पाद्मवचनेन, "सएव वासुदेवोयं साक्षात्पुरुष उच्यते ।" इति नारसिंहपुराणवचनेन, "भगवानिति यश्शब्दस्तथा पुरुष इत्यपि । निरुपाधीच वर्तेते वासुदेवे सनातने ॥ सर्वलोकपतिस्साक्षात्पुरुषः प्रोच्यतेहरिः । तंविनापुण्डरीकाक्षं कोन्यः पुरुषशब्दभाक् " इति वचनाभ्यांच पुरुषशब्दस्य भगवच्छब्दस्येव नारायणएव मुख्यवृत्तिसद्भावः, तदन्यत्रच "ज्ञान शक्ति बलैश्वर्य वीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥ एवमेष महाशब्दो मैत्रेयभगवानिति । परमब्रह्मभूतस्य वासुदेवस्य नान्यगः ॥ तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः । शब्दोयं नोपचारेण त्वन्यत्र ह्युपचारतः ॥" इत्युक्तरीत्या –ज्ञानशक्त्याद्यपरिच्छिन्नषाड्गुण्यपूर्णे भगवति वासुदेवे मुख्यशक्तस्य भगवच्छब्दस्य यथा तदन्यत्र तद्गुणलेशयोगादौपचारिक एवप्रयोगः, तथा पुरुषांशत्वनिबन्धनो गौणएव प्रयोग इतिच स्पष्टमुपलभ्यते । ... ...

तथाचापरिच्छिन्नज्ञानशक्त्यादियुक्तो भगवान्नारायण इति सहस्रशीर्षा इत्यादेः फलितोर्थः । ... ...

यत्तु कश्चिदाह – पुरुषशब्दो जीवात्मपरः, "प्रकृतिं पुरुषंचैव-विद्ध्यनादी उभावपि " "प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपि

णी । पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि " इत्यादौ जीवात्मन्यपि-पुरुषशब्दप्रयोगदर्शनात् । "पश्यत्यचक्षुस्सशृणोत्यकर्णः " "अचक्षुश्श्रोत्रं तदपाणिपादं " इत्यादिभिर्ब्रह्मणः सर्वेन्द्रियशून्यत्वप्रतीतेस्तस्य-सहस्रशीर्षत्वाद्यनुपपत्त्या सहस्रशीर्षादिपदसमानाधिकरणस्यात्रत्यपुरुषशब्दस्य तत्परत्वासंभवाच्च । नच जीवात्मनः सहस्रशिरस्कत्वं सर्वजगद्व्याप्त्यादिकं च न संभवति, तस्य कर्मानुगुणैकैकशरीरवत्त्वप्रसिद्धेः, "वालाग्रशतभागस्य शतधा कल्पितस्यच । भागो जीवस्सविज्ञेय स्सचानन्त्याय कल्पते " इत्यादिभिरणुत्व प्रतीतेश्चेति वाच्यम् । जन्मभेदेन एकस्मिन्नेव सौभर्यादिवद्योगमहिम्नाचानेकशिरस्कत्वादेः, मुक्तिदशायां धर्मभूतज्ञानद्वारा सकलजगद्व्याप्तेश्च संभवात् । इति । तत्र – "पुरुषएवेदं सर्वं " इति वक्ष्यमाणस्य शरीरशरीरिभावनिबन्धनस्यं सकलचेतनाचेतनाभेदस्य सकलजगत्कारणत्व मुमुक्षूपास्यत्व-लक्ष्मीपतित्वादीनाञ्च जीवेऽसंभावितत्वेन तस्यात्र प्रतिपाद्यत्वासंभवात् । "पश्यत्यचक्षुस्सशृणोत्यकर्णः " इत्यादेर्भगवत्संबन्धिज्ञानस्य चक्षुरादीन्द्रियानधीनत्व प्रतिपादनपरतायाः अन्यत्र निरूपितत्वात् । "अचक्षुश्श्रोत्रं " इत्यादेश्च भगवतः कर्मकृतप्राकृतचक्षुरादिशून्यत्वपरत्वाच्चानुपपत्त्यभावात् । तस्याशरीरत्वे "तस्य यथाकप्यासं पुण्डरीकमेवमक्षिणी " इत्यादि श्रुतिस्मृतिविरोधापत्तेश्च । ... ...

यदपि पुरुषशब्दो न नारायणैकान्तः, नारायणत्वावच्छिन्ने तस्य शक्त्यभावात् । "पुरुषावात्ममानवौ " इत्यभिधानकोशस्मृत्या लौकिकवैदिकप्रयोगप्राचुर्याच्चात्मत्वावच्छिन्नाया आत्मसामान्ये शक्तेरावश्यकतया तावतैव "पुरुषोहवै नारायणोकामयत " इत्यादिषु बोधोपपत्तौर्विशिष्यशक्त्यसिद्धेः । अन्यथा बर्हिराज्याधिकरणविरोधापत्तेः । तत्र - बर्हिराज्यादिशब्दानामार्यैस्संस्कृततृणघृतादिषु प्रयुज्यमानानाम् म्लेच्छैश्च संस्कारमनपेक्ष्य तृणत्वाज्यत्वजात्यवच्छिन्ने सर्वत्र प्रयुज्यमानानाम् किं सामान्यतस्तृणत्वघृतत्वादिरूजात्यवच्छिन्ने शक्तिरुत संस्कारसमानाधिकरणतादृशजात्यवच्छिन्न इति संदेहे, अशास्त्रज्ञम्लेच्छप्रयोगापेक्षया शास्त्रज्ञानामार्याणां प्रयोगस्यैव बलीयस्त्वेन संस्कृततृणत्वघृतत्वाद्यवच्छिन्न एव शक्तिरिति पूर्वपक्षे प्राप्ते, तृणत्वादिजात्यवच्छिन्न एवार्यैरपि प्र

योगात्तच्छून्ये कुत्रापि तैरप्यप्रयोगात्संस्कारशून्येच कुत्रचित्प्रयोगदर्शनाच्चान्वयव्यतिरेकाभ्यां तादृशप्रयोगस्य जातिनिबन्धनताप्रतीतिस्तदनुरोधेन तादृशजात्यवच्छिन्न एव शक्तिरितिहिसिद्धान्तितम् । एवञ्च प्रकृतेपि पुरुषशब्दस्यात्मभिन्ने कुत्राप्यप्रयोगान्नारायणत्वशून्येपि प्रयोगदर्शनाच्च तस्यात्मत्वजात्यवच्छिन्नएव शक्तेरावश्यकतया नारायणत्वावच्छिन्ने शक्तेरङ्गीकारे तदधिकरणविरोधोहिदुष्परिहरः । इति ।

तदपिन – “ पुरुषावात्ममानवौ ” इत्यभिधानकोशस्मृत्यनुरोधेन पुरुषशब्दस्यात्मत्वजात्यवच्छिन्ने शक्तेरावश्यकत्वेपि “ पुरुषोधातृपुन्नागनरात्मपरमात्मसु । ” “ पुराणपुरुषो यज्ञः पुरुषः पुरुषोत्तमः । ” इत्याद्यभिधानकोशस्मृत्यनुरोधेनैव परमात्मनि – विशेषशक्तेरप्यावश्यकत्वात् । एतादृशाभिधानकोशाच्छक्त्यसिद्धौच सामान्यशक्तेरप्यसिद्धिप्रसंगात् । आत्मत्वजात्यवच्छिन्ने सामान्यशक्तिसद्भावस्य परमात्मनि विशेषशक्तिसिद्धावप्रतिबंधकत्वात् । … …

नच सामान्यविशेषधर्मावच्छिन्नशक्तिद्वयांगीकारे गौरवान्नानार्थकत्वापत्तेश्च एकशक्त्यंगीकार आवश्यके विशेषधर्मावच्छिन्नशक्त्या सर्वत्रप्रयोगानिर्वाहेण सामान्यधर्मावच्छिन्नशक्त्यंगीकार इति वाच्यं । तत्तद्धर्मपुरस्कारेणानुभवस्य सर्वसिद्धतया तदनुरोधेन शक्तिद्वयांगीकारे गौरवस्याकिंचित्करत्वात । अन्यथा हर्यादिपदानामपि नानाधर्मावच्छिन्नेषु शक्त्यसिद्धिप्रसंगात् । आत्मत्वजात्यवच्छिन्नशक्त्या चेतनेषु पुरुषपदप्रयोगनिर्वाहेप्यचेतने पुन्नागे प्रयोगस्याशक्यनिर्वाहत्वेन तत्रातिरिक्तशक्तेरावश्यकतया नानार्थकत्वस्योभयथाप्यावश्यकत्वेना-दोषाच्च । … … …

नच तद्धर्मावच्छिन्नशक्तेस्तदन्यधर्मावच्छिन्नशक्तिसिद्धौ प्रतिबंधकत्वम् । हर्यादिपदानां नानाधर्मावच्छिन्नशक्तेस्सर्वसम्मतत्वेनासिद्धेः । नवा तद्धर्मावच्छिन्नशक्तस्य तद्व्याप्यधर्मावच्छिन्नशक्तत्वाभावइतिनियमः, तथात्वे “स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः” “ मृगः पशौ कुरंगेच” “ अनोकहः कुटस्सालः ” इत्यभिधानकोशप्रतिपन्नस्त्रीत्वपशुत्ववृक्षत्वजात्यवच्छिन्नशक्तिमताम् वधू मृगसालशब्दानाम् “स मास्स्नुषा जनी वध्वः ” “ मृगे कुरङ्गवातायु हरिणाजिनयोनयः ” “सा

लेतु सर्जकार्श्याश्वकर्णकास्सस्यसंवरः” इत्यभिधानकोशप्रतिपन्न स्नुषात्व हरिणत्व सर्जत्व जात्यवच्छिन्नशक्त्यभावप्रसङ्गात् । इष्टापत्तौच तत्तद्धर्मपुरस्कारेणानुभवव्यवहारयोर्विलोपप्रसङ्गात् । “इभ्य आढ्यो धनीस्वामी ईश्वरः पति रीशिता” इत्यभिधानकोशानुरोधात्सामान्यधर्मावच्छिन्नशक्तस्येश्वरशब्दस्यापि रुद्रत्वावच्छिन्ने शक्त्यभावप्रसङ्गाच्च ॥

यदपि सामान्यधर्मावच्छिन्नशक्तिमत्पदस्य विशेषधर्मावच्छिन्नशक्त्यङ्गीकारे बर्हिराज्याधिकरणविरोधप्रसंजनं, तदप्यत्र न संभवति । बर्हिराज्याधिकरणेहि बर्हिराज्यादिशब्दानां संस्कृततृणघृतादिमात्रविषय याज्ञिकप्रसिद्धेः यववराहाधिकरणन्यायेन जातिमात्रविषय म्लेच्छप्रयोगापेक्षया बलीयस्त्वेन तेषां शब्दानां संस्कारनिमित्तत्वमाक्षिप्य, याज्ञिकार्यप्रयोगाणामपि जात्यव्यभिचरिततया लोके क्वचिज्जातिनिबन्धनतया दृष्टानां शब्दानां विनानन्यथासिद्धप्रबलप्रमाणम् निमित्तान्तरकल्पनस्यान्याय्यत्वात् , जातिनिबन्धनत्वांगीकारेणार्यम्लेच्छप्रयोगयो रुभयोरपि निर्वाहसंभवात् , संस्कारनिमित्तत्वांगीकारे लौकिकप्रयोगस्य सुतरां बाधप्रसङ्गात्, संभवत्युभयोर्निर्वाहे अन्यतरबाधकल्पक संस्कारनिमित्ततांगीकारस्यानन्यथासिद्धप्रमाणमन्तराऽयुक्तत्वात , वेदेपि “बर्हिर्लुनाति ” “आज्यं विलापयति” इत्यादि संस्कारविधिवाक्येषु बर्हिरादिशब्दानां जातिमात्रनिमित्तानां दर्शनेन वैदिकप्रयोगानामपि संस्कारव्यभिचरितत्वेनान्यथासिद्धतया तादृशप्रयोगबलेन लौकिकप्रयोगबाधकल्पनासंभवात् , संस्कारविधिवाक्येष्वपि बर्हिराज्यादिशब्दानां संस्कारनिमित्ततांगीकारे यद्बर्हिराज्यादिशब्दवाच्यम् तत्संस्कार्यं यच्च संस्कार्यं तद्बर्हिराज्यादिशब्दवाच्यमित्यन्योन्याश्रयप्रसंगात् , “ बर्हिर्लुनाति ” “ आज्यं विलापयति ” इत्यादिवाक्येषु “यूपंछिनत्ति” इत्यादाविव यल्लुनाति तद्बर्हिः, यद्विलापयति तदाज्यं, इत्यर्थांगीकारे व्यवस्थितवचनव्यक्तिविपर्यासदोषात् , “ यूपं छिनत्ति ” इत्यादावगत्या तदाश्रयणेपि वचनव्यक्तिविपर्यासमन्तराप्युपपत्तिसंभवेन्न तदाश्रयणासंभवाच्च, तेषां शब्दानां जातिनिमित्तता व्यवस्थापिता । अयमंशः शाबरभाष्यादौ सुव्यक्तः । तत्र शाबरभाष्ये –

" बर्हिराज्ययोः, पुरोडाशेच सन्देहः, किमेते संस्कारशब्दा, उत जातिशब्दाः, इति । संस्कारशब्दा इति भ्रमः, संस्कृतेषु तृणेषु बर्हिश्शब्द मुपचरन्ति सर्वत्र नासंस्कृतेषु । संस्कृतेच घृते आज्यपदं । तथासंस्कृते पिष्टे पुरोडाशशब्दम् । ननु असंस्कृतेपि कस्मिंश्चिद्देश उपचर्यते, यथा – बर्हिरादाय गावो गता इति भवन्ति वक्तारः । तथा आज्यम् क्रय्यं इति, पुरोडाशेन मे माता प्रहेळकं ददाति, इति । सादृश्यात्तेषु प्रयोगः यथोपशये यूपशब्दः । कुत एतत् ? यत एकदेशेहि शब्दप्रयोगः । तस्मात्संस्कारशब्दाः इत्येवं प्राप्तं" ।

इत्यन्तेन ग्रन्थेन संस्कृतेष्वेव तृणघृतादिषु बर्हिराज्यादिशब्दानां प्रयोगात् असंस्कृतेषु क्वचित्प्रयोगस्य सादृश्यनिबन्धनतयोपपत्तेस्तेषां संस्कारशब्दत्वमिति पूर्वपक्षयित्वा ।

" एवं प्राप्ते ब्रूमः, बर्हिरादिष्वसंस्कृतेष्वपि शब्दलाभान्न संस्कारशब्दाः । नतूक्तं सादृश्यादेकदेशे भविष्यन्ति । तन्न, प्रसिद्धेहि संस्कारशब्दत्वे सादृश्यादिति शक्यते वक्तुम् । तच्चा प्रसिद्धं । कथं ? बर्हिरादिशब्दै रुद्दिश्यसंस्कारा विधीयन्ते, तेन सत्सु शब्देषु संस्कारै र्भवितव्यं सतिच संस्कारे शब्दलाभः इतीतरेतराश्रयं भवति "।

इत्यनेन ग्रन्थेन वेदे संस्कारविधिवाक्येष्वन्योन्याश्रयप्रसंगेन संस्कारनिमित्तत्वासंभवात् संस्कारनिमित्तताया अनन्यथासिद्धप्रमाणसिद्धत्वाभावेन लौकिकप्रयोगानांबाधस्यवक्तुमशक्यत्वात्तदनुसारेण जातिनिमित्तत्वांगीकार स्यैवयुक्तत्वाच्च नतेषां संस्कारनिमित्तत्वमित्युक्तम् ॥

तन्त्रवार्तिकेप्ययमर्थस्स्पष्टीकृतः । तत्रच –

" पुरोडाशादिभिर्लोके व्यवहारो न दृश्यते ।
तस्माद्यूपादिवद्वेदा त्तेषां संस्कारहेतुता "

इत्यनेन पूर्वपक्षमुपन्यस्य, " तन्नास्ति कुतः

एकदेशेपि यो दृष्टश्शब्दो जातिनिबन्धनः ।
तदत्यागान्न तस्यास्ति निमित्तान्तरकल्पना ॥ "

इत्यनेन क्वचि जातिनिबन्धनतया दृष्टस्यास्य शब्दस्य संस्काररूपनिमित्तान्तरकल्पनासंभवं प्रतिपाद्य,

" वेदेनापिच संस्कारात्प्रागेव च्छेदनादिकात ।
तद्विधौ जातिशब्दत्व माश्रितं लोकसम्मतम् ॥ "

इत्यनेन संस्कारविधिवाक्येषु वेदेप्य न्योन्याश्रयप्रसंगादिना संस्कारनिमित्तत्वासंभवा जातिनिमित्तत्वाश्रयणावश्यंभावेन वैदिकप्रयोगस्यापि संस्कारव्यभिचरितत्वेनान्यथासिद्धिम्प्रसाध्य,

" नचयूपादितुल्यत्व मन्यथाप्युपपत्तितः ।
लोकादलभ्यमानार्था स्तेह्यगत्या तथाश्रिताः ॥ "

इत्यनेन संस्कारविधिवाक्येषु वचनव्यत्यासकल्पनेन बर्हिरादिशब्दानां संस्कारनिमित्तत्वकल्पनस्यानन्यगतिकत्वाभावेनासंभवं प्रसाध्य निगमितम् ॥ ... ...

तथाचान्योन्याश्रयप्रसंगादिभिया वैदिकवाक्येष्वपि केवलजातिनिमित्तताया आवश्यकत्वाद्वैदिकप्रयोगस्यान्यथासिद्धतया न तद्बलात्संस्कारनिमित्तत्वसंभव इति तदधिकरणनिष्कृष्टार्थसिद्धः ॥ ...

प्रकृतेच पुरुषशब्दस्य भगवति नारायणे लौकिकवैदिकप्रयोगानां बहूनां वक्ष्यमाणानां सत्वात्, तेषाश्चान्योन्याश्रयप्रसंगाद्यभावेनविशेषधर्मव्यभिचरितत्वाभावेना नन्यथासिद्धत्वात्, विशेषधर्मावच्छिन्नशक्त्यंगीकारे सामान्यधर्मावच्छिन्नशक्तिमूलकप्रयोगानां बाधाभावात्, विशेषधर्मपुरस्कारेणानुभवस्य सर्वसिद्धत्वात् केवलगौरवमात्रेण तदनङ्गीकारस्यायुक्तत्वात्, तद्धर्मावच्छिन्नशक्तिग्राहकाभिधानकोशसत्वाच्च, भगवति विशेषशक्ति रङ्गीकृतेति बर्हिराज्याधिकरणनयस्यात्रावतारासंभवेन तद्विरोधस्य सुतरामप्रसक्तेः ।

तस्मात्पुरुषशब्दस्य भगवतिविशेषशक्तिसिद्धिर्निष्प्रत्यूहैव ॥

किञ्च – अभिधानकाशान हि न स्वातन्त्र्येण कुत्रचित्कस्यचिच्छब्दस्य शक्त्यादिग्राहकत्वं कैश्चिदपिवाङ्गीकृतं, किन्तु तत्तच्छब्दानां तेषु

तेष्वर्थेषु प्रामाणिक प्रचुरप्रयोगसद्भावज्ञापनमुखेनैव । तत्तत्कोशकारा हि तेषु तेष्वर्थेषु बहुशः प्रयुज्यमानांश्छब्दानेकत्र संघटयामासुः ।

" नानार्थाः केऽपि कान्तादिवर्गेष्वेवात्र कीर्तिताः ।
भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते ॥ "

इत्यमरसिंहेनाभिधानकोशस्य भूरिप्रयोगमूलताहि प्रख्यापिता । अतएव "शेषन्तु ज्ञेयं शिष्टप्रयोगतः ।" इत्यमरकोशान्तिमश्लोके कोशानुक्तशब्दानां शिष्टप्रयोगाज्ज्ञेयत्वोक्त्या कोशस्यापि शिष्टप्रयुज्यमानपद संग्रहरूपता सूचिता । किम्बहुना, व्याकरणशास्त्रस्यापि प्रयोगानुरोधित्वम् महाभाष्यकारादिभिः स्पष्टमुक्तं व्याकरणशास्त्रप्रयोजनकथनावसरे । एवञ्च पुरुषशब्दस्य श्रुतिस्मृतीतिहासपुराणादिषु सहस्रशो भगवति नारायणे प्रयुक्तत्वा त्तद्वला द्विशेषशक्तिसिद्धिः केन वार्येत ।

तथाहि – श्रुतिषु–तापनीयोपनिषदि–"तमुवाच पुरुषः प्रजापते शृणु सृष्टे रुपायम्" इत्यत्र, सुबालोपनिषदि- " पुरुष एवेदं सर्वं " इत्यत्र, महोपनिषन्नारायणानुवाकयोः- "विश्वमेवेदं पुरुषः" इत्यत्र , नारायणोपनिषदि- "पुरुषो हवै नारायणोऽकामयत" इत्यत्र, शतपथे "पुरुषोहवै नारायणोऽकामयत" "पुरुषंह नारायण म्प्रजापतिरुवाच,, इत्यत्र, आरुणकेतुके- "सहस्रशीर्षा पुरुषः । सहस्राक्ष स्सहस्रपात् " इत्यत्रच, पुरुषशब्दोभगवति नारायणे प्रयुक्तः ॥

स्मृतिषु – बोधायनसूत्रे विष्ण्वाराधनप्रकरणे –
" अनेन विधिना कृत्वा स्नपनं पुरुषस्यतु ।
दत्वा पायस मन्नञ्च शेषं परिसमापयेत् ॥ " इत्यत्र,

विष्णुस्मृतौ - अष्टनवतितमाध्याये -

" तत्राप्यसमर्थः स्वहृद यपद्मस्यावाङ्मुखस्य मध्ये दीपवत्पुरुषं ध्यायेत् । तत्राप्यसमर्थो भगवन्तं वासुदेवं किरीटिनं कुण्डलिनमंगादिनं श्रीवत्सांकम् वनमालाविभूषितोरस्कम् सौम्यरूपं चतुर्भुजम् शङ्खचक्र गदापद्मधरम् चरणमध्यगतभुवं ध्यायेत् । यद्ध्यायति तदाप्नोति ध्यानगुह्यम् । तस्मात्सर्वमेवक्षरं त्यक्त्वा अक्षरमेव ध्यायेत् । नच पुरुषं विना किञ्चिदप्यक्षरमस्तितं प्राप्य मुक्तो भवति ।

पुरमाक्रम्य सकलं शेते यस्मान्महाप्रभुः ।
तस्मात्पुरुष इत्येवं प्रोच्यते तत्वचिन्तकैः ॥
प्राग्रात्रापररात्रेषु योगी नित्यमतन्द्रितः ।
ध्यायेत पुरुषं विष्णुं निर्गुणं पञ्चविंशकं ॥ " इत्यत्र,

तथा शङ्खस्मृतौ- सप्तमाध्याये –

" स्वदेह मरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यान्तु विष्णुम् पश्येद्धृदि स्थितम् ॥
हृद्यर्कश्चन्द्रमा स्सूर्य स्सोमो मध्ये हुताशनः ।
तेजोमध्ये स्थितं तत्वं तत्वमध्ये स्थितोऽच्युतः ॥
अणोरणीया न्महतोमहीया नात्मास्य जन्तोर्निहितो गुहायां ।
तेजोमयं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः ॥
वासुदेव स्तमोन्धानां प्रत्यक्षो नैव जायते ।
अज्ञानपटसंवीतै रिन्द्रियै र्विषयेप्सुभिः ॥
एष वै पुरुषो विष्णु र्व्यक्तयाव्यक्त स्सनातनः । " इत्यत्र,

इतिहासेषु श्रीरामायणे –

" प्राणायामेन पुरुषं ध्यायमाना जनार्दनम् । "

" अमोघं बत मे क्षान्तं पुरुषे पुष्करेक्षणे ॥ "

" असौ रामो महाबाहु रतिमानुषचेष्टया ।
तेजोमहत्तयाचापि संस्मारयति पूरुषम् ॥ " इत्यादिस्थलेषु,

महाभारते –

" पुरुष स्सविभुः कर्ता सर्वलोकपितामहः ।
धर्मसंस्थापनार्थाय प्रजज्ञेऽन्धकवृष्णिषु ॥ "

" पुरुषं विश्वकर्माणं हंसं नारायणं विभुम् । "

" नारायणस्तु पुरुषो विश्वरूपो महाद्युतिः ।:"

चतुर्विभक्तः पुरुष स्सक्रीडति यथेच्छति ॥ "

इत्यादिपरश्शतस्थलेषु,

हरिवंशे –

" पुरुषस्यांशसम्भूतं त्वां वयं निरणैष्महि । " इत्यादिस्थलेषु, पुराणेषु – आग्नेये –

" अथवा पुरुषसूक्तेन पुरुषं नित्यमर्चयेत् ।
अर्चनं संप्रवक्ष्यामि विष्णोरमिततेजसः ॥ " इत्यादौ,

भागवते –

" तत्र गत्वा जगन्नाथं वासुदेवं वृषाकपिं ।
पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ॥ " इत्यादिस्थलेषु,

महाकाव्येषु रघुवंशे त्रयोदशसर्गे –

" नाभिप्ररूढांबुरुहासनेन संस्तूयमानं प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्रं संहृत्य लोकान्पुरुषोधिशेते ॥ "

कुमारसंभवे – (इत्यत्र,

"तमभ्यगच्छत्प्रथमो विधाता श्रीवत्सलक्ष्मा पुरुषश्च साक्षात् ।"

इत्यत्र, एवमन्यत्रच भगवति नारायणे पुरुषशब्दः प्रयुक्तो दृश्यते ।

तस्माद्बहुतरप्रयोगसंवलितोभिधानकोशश्श्रीमति नारायणे पुरुषशब्दस्य विशेषशक्तिं सुतरामेव साधयति ।

एतेन- पुरुषशब्दस्य नारायणेपि कुत्रचित्प्रयोगदर्शनेपि गंगायां घोषः, आदित्यो यूपः, इत्यादौ लक्षणामूलकप्रयोगानामपि दर्शनेन प्रयोगानां शक्तिव्यभिचरिततया न तावन्मात्रेण विष्णौ पुरुषशब्दस्य विशेषशक्तिसिद्धिः, अभिधानकोशानां च तादृशव्यभिचारादर्शनेन शक्तिसाधकत्वसंभवा त्पुरुषशब्दस्यात्मत्वावच्छिन्ने शक्तिसिद्धया तयैव शक्त्याक्वचिद्विष्णौ पुरुषशब्दप्रयोगस्यापि निर्वाहः । इति निरस्तं – अभिधानकोशस्य प्रचुरतमप्रामाणिकप्रयोगमूलतायाः पूर्वं निरूपितत्वेन प्रयोगानामेवान्यथासिद्धि संभवेऽभिधानकोशानां तन्मूलकानामन्यथासिद्ध्यसंभवस्य दुर्वचत्वात् । अभिधानकोशेष्वपि "अवदात स्सितो गौरः" "पत्नी पाणिगृहीत्री स्यात् " इत्यादिस्थलेषु लाक्षणिकानामवदातपत्न्यादिशब्दानां दर्शनेनाभिधानकोशानामपि शक्तिव्यभिचरिततया तेषामपि शक्तिग्राहकत्वासंभवात् । अवदातपत्न्यादिशब्दानां शुक्लवर्णभा

र्यात्वादिविशिष्टवाचकतयाभिधानकोशप्रतिपन्नानांहि

" नैषवर्णवाची । किन्तर्हि विशुद्धिवाची । अतश्च विशुद्धिः ।

एवंह्याह –

' त्रीणि यस्यावदातानि विद्या योनिश्च कर्मच ।
एतच्छीलं विजानीहि ब्राह्मणाग्र्यस्य लक्षणम् ॥ "

" तत्र नेदं सिद्ध्यति । इयमस्य पत्नी । क्वतर्हि स्यात् । " पत्नीसंयाजा " इति यत्र यज्ञसंयोगः । नैष दोषः । पतिशब्दोयमैश्वर्यवाची । सर्वेण गृहस्थेन पञ्चमहायज्ञा निर्वर्त्याः, यच्चादः सायं प्रातर्होमं चरुपुरोडाशान्निर्वपति तस्यासावीष्टे । एवमपि तुषजकस्य पत्नी नसिद्ध्यति । उपमानात्सिद्धं पत्नीव पत्नी "

इत्यादिमहाभाष्यादिग्रन्थेषु परिशुद्ध्यैश्वर्य वाचकतायाः, शुक्लवर्णभार्यात्वादिविशिष्टावाचकतायाश्च प्रतिपादनेन तेषां तेष्वर्थेषु शक्त्यभावेन लाक्षणिकत्वमावश्यकम् ।

नचाभिधानकोशानां क्वचित्स्थलविशेषे बाधकसत्त्वेन शक्तिग्राहकत्वासंभवेपि असति बाधके शक्तिग्राहकत्वमस्त्येवेति वाच्यम् । तथा सति प्रयोगानामप्यसति बाधके शक्तिग्राहकत्वसंभवात् पुरुषशब्दस्य भगवति विशेषशक्तिसिद्धे र्निष्प्रत्यूहत्वात् ॥

किञ्च श्रौतस्मार्तनिर्वचनान्यपि पुरुषशब्दस्य भगवति विशेषशक्तिसिद्धिम् दृढयन्ति । तथाहि-आरुणकेतुके-"सोपां अन्तरतः कूर्मभूतँ सर्पन्तम् तमब्रवीत । ममैव त्वं मां सा समभूत् । नेत्यब्रवीत् पूर्वमेवाहमिहासमिति । तत्पुरुषस्य पुरुषत्वम् । " इति श्रूयते । अत्रच "पूर्वमेवाहमिहासं" इत्यनेन स्रष्टुः पूर्वकालवर्तित्वप्रतिपादनमुखेन पुरुषशब्दस्य सकलजगत्कारणत्वं प्रवृत्तिनिमित्ततया प्रतिपाद्यते । तच्च कारणत्वं "सदेव सौम्येदमग्र आसीत् " "ब्रह्मवा इदमेकमेवाग्र आसीत्" "आत्मावा इदमेक एवाग्र आसीत्" "एकोहवै नारायण आसीत् " इत्यादिषु कारण वाक्येषु सर्वशाखाप्रत्ययन्यायेन छागपशुन्यायेनच

नारायणैकान्ततया निर्णीतमिति नारायण एव पुरुषशब्दस्य मुख्यशक्ति सिद्ध्यति ।

एवं बृहदारण्यके - "सयः पूर्वोस्मा त्सर्वस्मा त्सर्वान्पाप्मन औष त्तस्मा त्पुरुषः" इति श्रूयते । अत्रच श्रुत्यन्तरसिद्धम् सकलजगत्कारणत्वं "सयः पूर्वोस्मात्सर्वस्मात् " इत्यनूद्य " सर्वान्पाप्मन औषत्" इति अपहतपाप्मत्वञ्चोक्त्वा "तस्मात् " इत्यनेन पूर्वोक्तजगत्कारणत्वापहतपाप्मत्वे निमित्तीकृत्य पुरुषत्वविधाना ज्जगत्कारणत्वसहित मपहतपाप्मत्वं पुरुषशब्दप्रवृत्तिनिमित्त मुक्तं भवति । जगत्कारणत्वंच पूर्वोपदर्शितरीत्या भगवति नारायणे सिद्धमेव, अपहतपाप्मत्वमपि " एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एकोनारायणः " इति श्रुत्या भगवति सिद्धमिति भगवति नारायणे पुरुषशब्दशक्तिं निष्प्रत्यूह मनेन निर्वचनेन सिद्ध्यति ।

एव मन्यान्यपि श्रौतनिर्वचनानि ज्ञेयानि । स्मार्तानितु " पुंसं ज्ञेतुशरीरेस्मिन् " इत्यादीनि पूर्वमेव कानिचिदुदाहृतानि । अन्यानि चान्यत्र ज्ञेयानि । तस्मा न्निर्वचनबलादपि भगवति विशेषशक्तिसिद्धिर्दुष्परिहरा ।

यत्त्वत्र कश्चिदाह -- यद्यपि कानिचि त्पौराणिकनिर्वचनानि विष्णौ पुरुषशब्दस्य शक्तिसद्भावप्रतिपादनच्छायापन्नानि सन्ति । तावता न पुरुषशब्दस्य विष्णौ विशिष्यापि शक्तिसिद्धिः । सामान्यतआत्मत्वावच्छिन्ने शक्तस्य पुरुषशब्दस्य श्रुत्यादिषु क्वचित्प्रकरणादिवशान्नारायणेपि पर्यवसानमस्तीत्येतावज्ज्ञापनेन चरितार्थानां अर्थवादप्रधानपौराणिकनिर्वचनानां स्तुत्यादिपरत्वेनान्यथासिद्धतया तेषां शक्तिग्राहकत्वासिद्धेः । अन्यथा - चित्राज्याधिकरणे स्तोत्रविशेषनामतया प्रसिद्धस्य प्रष्ठशब्दस्य " आपोवा ऋत्वियमार्छन् " इत्याद्यर्थवादबलेन रथन्तरादिष्वपि शक्तिसिद्धिप्रसंगः । तस्य " प्रष्ठैरुपतिष्ठते " इत्यादौ क्वचित्प्रष्ठशब्दस्य लाक्षणिकप्रयोगनिमित्तज्ञापनेन चरितार्थतयान्यथासिद्धिसंभवेतु प्रकृतपौराणिकवचनानामपि तुल्या रीतिः । इति,

तदपिन -- सामान्यधर्मावच्छिन्नशक्तशब्दस्य क्वचि द्विशेषपर्यवसानमस्तीत्येतत्परिज्ञानस्य प्रकरणादिनैव संभवेन तत्र निर्वचनानामनुपयुक्ततया तेषां शक्तिकल्पनमन्तरा सार्थक्यासंभवात् । "पशुना यजेत" इत्यत्र पशुत्वरूपसामान्यधर्मावच्छिन्नशक्तस्य पशुशब्दस्य "छागस्य वपाया मेदसः" इतिमन्त्रवर्णोक्तछागरूपविशेषे पर्यवसानस्य निर्वचनमन्तरापि सर्वमीमांसकैरप्यंगीकृततया तन्न्यायेनात्रापि विशेषे पर्यवसानसंभवेन निर्वचनानां नैरर्थक्यस्य दुर्वारत्वात । प्रकृते निर्वचनापेक्षायां तुल्यरीत्या पशुशब्दस्य छागरूपविशेषपर्यवसानं प्रत्यपि निर्वचनापेक्षायां तदभावेन तत्र विशेषपर्यवसानाभाव प्रसंगात ।

"आपोवा ऋत्वियमार्छन्" इत्याद्यर्थवादस्य पृष्ठशब्दनिर्वचनरूपत्वाभावेन तस्य रथन्तरादिषु पृष्ठशब्दस्य शक्तिग्राहकत्वासंभवेपि "तत्पुरुषस्य पुरुषत्वं" इत्याद्यर्थवादानां निर्वचनरूपत्वेन शक्तिग्राहकत्वसंभवात् ।"आपोवा ऋत्वियमार्च्छन्"इत्यर्थवादस्य हि " ततोवसुवामं संमभवत " इत्याद्युत्तरवाक्यैर्वामदेव्यपदनिर्वचनरूपत्वमेव स्पष्टमुपलभ्यते । नतु पृष्ठशब्दनिर्वचनरूपत्वम् । येन तद्बलात्पृष्ठशब्दस्य रथन्तरादिषु शक्तिस्सिद्ध्येत । प्रत्युत अपांपृष्ठाद्वामदेव्यद्वारकव्यवहितोत्पत्तिरूपलक्षणानिमित्त प्रतिपादनमुखेनरथन्तरादिषु पृष्ठशब्दस्य लाक्षणिकत्वमेव स्फुटीकृतंभवति । तस्मादुपदर्शितनिर्वचनबलात्पुरुषशब्दस्य विष्णौ विशेषशक्तिसिद्धिर्निष्प्रत्यूहैव ।

एतेन - "अपशवोवा अन्ये गोअश्वेभ्यः" इतिवत् प्रशंसाधिकरणन्यायेन पौराणिकवचनानां केवल प्रशंसापरत्वेन पुरुषशब्दस्य न नारायणैकान्त्यसिद्धिरिति-प्रत्युक्तम् ।"अपशवो वाअन्ये गोअश्वेभ्यः पशवो गो अश्वानेवास्मैसमिचोदधाति" इति श्रौतार्थवादस्य निर्वचनरूपत्वाभावात् , "सप्तग्राम्याः पशवस्सप्तारण्याः" इतिश्रुत्यन्तरविरोधात् , 'समिच' इति कण्ठतएव प्राशस्त्योक्तेः, वैशब्दोपबंधाद्धिष्यन्तरशेषत्वाच्च गवाश्वगतप्राशस्त्यपरत्वेपि प्रकृतनिर्वचनानां तादृशदोषाभावेन शक्तिसाधकत्वसंभवात ।

अधिकं कौस्तुभादावनुसन्धेयम् ।

तस्मात्पुरुषशब्दो नारायणैकान्त एवेति सिद्धम् ।

अथ पूर्वोक्तं ज्ञानशक्त्यादियोगंप्रपञ्चयति (सहस्राक्षस्सहस्रपादिति) सहस्रशब्दः पूर्ववदानन्त्यवचनः । अक्षशब्दोज्ञानेन्द्रियाणांसर्वेषामुपलक्षणम् । तेन तत्कार्यं लक्ष्यते । तथाचापरिच्छिन्नज्ञानवानितिपर्यवसितार्थः । एवं पादशब्दः कर्मेन्द्रियाणां सर्वेषामुपलक्षणम् । तेन च तत्कार्यं लक्ष्यते । तथाचापरिच्छिन्नशक्तिमानिति पूर्ववत्पर्यवसितार्थः । सहस्रनेत्रवान् , सहस्रपादवनितिवार्थः ।

अथ पुरुषशब्देनसंग्रहेणोक्तां सर्वजगद्व्याप्तिं विशदयति (सभूमिं विश्वतोवृत्वा अत्यतिष्ठद्दशांगुळमिति) सः- ज्ञानशक्त्यादिपरिपूर्णः परमपुरुषः । भूमिं-सकलञ्चेतनाचेतनजातम् । भवतीति भूमिरितिव्युत्पत्त्यासत्तायोगिपदार्थजातं कृत्स्नमपि भूमिशब्देनोच्यते । "यच्चकिंचिज्जगत्यस्मिन् दृश्यते श्रूयतेपिवा । अन्तर्बहिश्चतत्सर्वंव्याप्य" इत्यादिनैकार्थ्याच्चायमेवार्थः । विश्वतः-सर्वप्रदेशावच्छेदेन, अन्तर्बहिश्चेत्यर्थः । वृत्वा-व्याप्य, अन्तर्याम्यादिरूपेणावस्थायेत्यर्थः । "अन्तर्बहिश्च तत्सर्वंव्याप्यनारायणस्स्थितः" इत्युक्तेः । दशांगुळम् - अनन्तयोजनम् । अत्यतिष्ठत् - अतिक्रम्यातिष्ठत । "दशदंशनानन्त्ययो" रित्यस्माद्दच्प्रत्ययः , "अगिकोटियोजनयो,, रित्यस्मादौणादिकउलच्प्रत्ययश्च । ततश्चदशांगुळशब्देनानन्तयोजनलाभः । उपबृंहितश्चायमर्थः श्रीशास्त्रे, " अनन्तयोजनं प्राह दशांगुळवचास्त्विदम्" इति । अत्रचव्याप्यापेक्षया व्यापकस्या परिच्छिन्नत्वेतात्पर्यम् ।

केचित्तु - भूमिं - भूम्यादिलोकजातं । विश्वतोवृत्वा - सर्वतोव्याप्य । दशांगुळं - दशगुणं । इदमुपलक्षणं, अनन्तपरिमाणमितियावत् । अत्यतिष्ठत् - अतीत्यातिष्ठत । इति व्याचक्रुः ।

अन्येतु - भूमिं - भूम्यधिष्ठानं देहस्याधोभागम् । विश्वतोवृत्वा । दशांगुळं - नाभेरूर्ध्वं दशांगुळपरिमितं देशं । अत्यतिष्ठत्-अतिक्रम्यहृदयमण्डलेतिष्ठदित्यर्थः । इतिवर्णयन्ति ।

द्वितीया - ऋक् ।

पुरुषएवेदँसर्वं । यद्भूतंयच्चभव्यं ।
उतामृतत्वस्येशानः । यदन्नेनातिरोहति ॥ २ ॥

अथ परमपुरुषस्य नकेवलमाकाशादिव द्व्याप्तिः, अपितु अन्तर्यामिरूपेणापीत्याह (पुरुषएवेदँसर्वमित्यादि) अत्रच प्रत्यक्षविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नवाचके नेदंशब्देन वर्तमानकालिकं चेतनाचेतनात्मकं कृत्स्नं पदार्थजातमुच्यते । वर्तमानकालिकस्यैव प्रत्यक्षविषयत्वा दिदंशब्देन तत्कथनञ्च नानुपपन्नम् । सर्वमित्येतत् यद्भूतं यच्चभव्यमित्यत्राप्यन्वेति । तथाच यद्वर्तमानकालिकं यद्भूतकालिकं यच्चभविष्यत्कालिकं तत्सर्वमित्यर्थः । तादृशसर्वशरीरकं ब्रह्मेतियावत् । सर्वशब्दस्य सर्वशरीरकब्रह्मपरत्वात्तदेकदेशेसर्वस्मिन् वर्तमानकालिकादीना मभेदेनान्वयाच्च वर्तमानभूतभविष्यदभिन्नसर्वशरीरकब्रह्मलाभः । पुरुषएव - पुरुषशब्दवाच्यनारायणाभिन्नमेव इत्यर्थः । सामानाधिकरण्यस्थले भेदसंम्बन्धावच्छिन्नप्रकारताशालिबोधस्य सर्वानुभवसिद्धत्वात् , अनन्यथासिद्धजीवलिंगनिर्देशस्थले ष्वेकदेशान्वयव्युत्पत्ते र्भाष्यादिसिद्धत्वाच्च ।

अथवा - यद्भूतं - यद्भूतकालिकं, यच्चभव्यं - यच्चभविष्यत्कालिकं, इदं सर्वं भूतभविष्यत्कालिककृत्स्नपदार्थजातं तादृशकृत्स्नशरीरकं ब्रह्मेत्यर्थः । अत्रकल्पे इदमित्यनेन भूतभविष्यत्कालिकयोरेवबुद्धिस्थयोः प्रत्यक्षवन्निर्देशः । "पुरुषएवे" त्यादेस्तु पूर्ववदेवार्थः । स्ववृत्ति प्रागभावप्रतियोगिक्षणवृत्तित्वसंबंधेन क्षणविशिष्टत्वरूपस्य भविष्यत्त्वस्य स्ववृत्तिध्वंसप्रतियोगिक्षणवृत्तित्व सम्बन्धेन क्षणविशिष्टत्वरूपस्य भूतत्वस्य चात्रविवक्षितत्वा न्नवर्तमानकालिकपदार्थाकथन प्रयुक्तन्यूनता । क्षणिकपदार्थानभ्युपगमेन सर्वेषामेव पदार्थानां स्ववृत्तिध्वंसप्रतियोगिक्षणवृत्तित्वसंबन्धेन स्ववृत्तिप्रागभावप्रतियोगिक्षणवृ

त्तित्वसंबंधेनवा किञ्चित्क्षणविशिष्टत्वावश्यकतया निरुक्तभूतभविष्यत्त्व-
वत्पदार्थभिन्नस्य कस्याप्यभावात् ।

अथ - भूतत्वभविष्यत्त्वयो र्निरुक्तरूपत्वे तत्तत्पूर्वोत्तरयत्किञ्चित्-
क्षणमादाय सर्वेषामपि त्रैकालिकपदार्थानां निरुक्तसंबन्धेन तद्वैशिष्ट्य
स्य सूपपादतया भाविपदार्थानां भूतत्वव्यवहारस्य भूतपदार्थानां भ
विष्यत्त्वव्यवहारस्यचापत्तिः । यदिच पूर्वोत्तरकालवर्ति न्येकस्मिन्नेव-
पदार्थे भूतत्वभविष्यत्त्वव्यवहारयोः कालभेदेनांगीकार आवश्यकए-
वेति तत्रेष्टापत्तिरेवेयुच्यते । तदापि ध्वस्तोत्पत्स्यमानपदार्थयो स्तादृश
व्यवहारापत्तिर्दुर्वारैव । नच- तयोरपिपदार्थयो स्तादृशव्यवहाराविष्टा-
वेव, ध्वस्तपदार्थे तदुत्पत्तेः पूर्वं भविष्यत्त्वस्य तन्नाशानन्तरं भूत
त्वस्यच संभवात्, उत्पत्स्यमानेप्युत्पत्तेः पूर्वं भविष्यत्त्वस्य तन्नाशा
नन्तरं भूतत्वस्यच संभवादिति वाच्यम् । ध्वस्तपदार्थे ध्वंसोत्पत्त्य
नन्तरं भविष्यत्त्वव्यवहारस्य उत्पत्स्यमानपदार्थे तदुत्पत्तेः पूर्वं भूत-
त्वव्यवहारस्य चापत्ते र्दुर्वारत्वात् । नच शब्दप्रयोगाधिकरणकाला
व्यवहितोत्तरक्षणवृत्तिध्वंसप्रतियोगिक्षणवृत्तित्वं -भूतत्वं, तादृशकालाव्य-
वहितपूर्वक्षणवृत्ति प्रागभाव प्रतियोगिक्षणवृत्तित्वंच भविष्यत्त्व मितिनो
क्तदोषावसरइतिवाच्यम् । एवमपि सर्वेषामेवकालानां यत्किञ्चि-
त्पुरुषीय शब्दप्रयोगाधिकरणतया सर्वेषामेवक्षणानां तादृशक्षणत्वसं-
भवेन तद्वृत्तित्वमादाय निरुक्तापत्ते र्दुर्वारत्वात् । शब्दप्रयोगत-
त्पुरुषीयत्वं निवेश्य पुरुषभेदेन भूतत्वभविष्यत्त्वयो र्विभिन्नयो निर्व-
चनेनान्यपुरुषीयशब्दप्रयोगाधिकरणकाल मादाय तत्पुरुषीयव्यवहारवार
णेपि तत्पुरुषीयानेकशब्दप्रयोगाधिकरणकालेषु यत्किञ्चित्काल मादा-
य ध्वस्तोत्पत्स्यमानपदार्थयो स्तत्पुरुषस्य तादृशव्यवहारापत्ते र्दुर्वार-
त्वात् । किंच - अव्यवहितो त्तरत्वादि शरीरे शब्दप्रयोगाधिकरण
कालस्य तादृशकालत्वेन निवेशे सर्वेषामेव क्षणानां तादृशयत्किंचिच्छब्द
प्रयोगाधिकरण कालध्वंसाधिकरण क्षणध्वंसाधिकरणतया तदनधिकरण
क्षणाप्रसिद्धिः । स्वध्वंसाधिकरण क्षणध्वंसानधिकरणत्व स्वध्वंसा-
धिकरणत्वोभयसंबंधेन शब्दप्रयोगाधिकरण कालविशिष्टत्वरूपस्य त-

स्य निवेशेन तद्दोषवारणेपि पूर्वोक्तापत्तिर्दुर्वारैवेति चेन्न । स्ववृ-
त्ति ध्वंस प्रतियोगि क्षण वृत्तित्व सम्बन्धेन स्वाव्यवहितोत्तर क्षण-
वृत्तिध्वंसप्रतियोगिक्षणवृत्तित्वसंबंधेनवा तत्क्षणविशिष्टत्वं तत्क्षणापे-
क्षया भूतत्वम् , स्ववृत्तिप्रागभाव प्रतियोगि क्षण वृत्तित्व सम्बन्धे
न स्वाव्यवहितपूर्वक्षणवृत्तिप्रागभाव प्रतियोगिक्षणवृत्तित्वसम्बन्धेनवा त
त्क्षणविशिष्टत्वं तत्क्षणापेक्षयाभविष्यत्त्व मितिविवक्षणीयतया दोषाभा-
वात् । अत्र चाव्यवहितोत्तरत्वादिकं स्वध्वंसाधिकरण क्षण ध्वंसा-
नधिकरणत्व स्वध्वंसाधिकरणत्वोभयसम्बन्धेन तत्क्षणविशिष्टत्वादिरूप
न्निर्वाच्यम् ।

अथवा स्ववृत्ति ध्वंसप्रतियोगीत्यादिसम्बन्धेन क्षणविशिष्टत्वादि
रूपमेव भूतत्वं भविष्यत्त्वंच । भूतादिशब्दानां तादृशक्षणत्वेन स्व
प्रयोगाधिकरण क्षणबोधकत्वव्युत्पत्त्यङ्गीकारेणच पूर्वोक्तदोषावारणा-
याः । एतेन - भूतभव्यादिशब्दानां तत्तत्क्षणभेदेन नानार्थकत्वापत्ति-
रित्यपि परास्तंवेदितव्यम् ।

अन्यदत्रवक्तव्यं विद्वद्भिस्स्वयमूह्यं विस्तरभयान्नलिख्यते ।

इदमत्रावधेयम् ।

अपृथक्सिद्धविशेषणवाचिन श्शब्दा विशेष्य पर्यन्तवाचिनः, नी-
लमुत्पलं अयंगौरित्यादौ नीलादिगुण गोत्वादिजाति वाचिनां नीलादि-
पदाना मुत्पलादिपद सामानाधिकरण्यानुरोधेन विशेष्यवाचित्वावश्य-
कत्वात् । अन्यथा नीलादिगुण गोत्वादिजाति वाचिनां नीलगवा
दिशब्दाना मुत्पलादिशब्दै स्सामानाधिकरण्यानुपपत्तेः । सामाना-
धिकरण्यंहि स्वप्रयोज्य विषयता विशिष्ट विषयता प्रयोजकत्व संब
न्धेन पदविशिष्ट पदत्व रूपम् । वैशिष्ट्यंच स्वानवच्छेदकधर्माव
च्छिन्नत्व स्वनिरूपित तादात्म्यनिष्ठविषयतानिरूपित त्वोभयसंबन्धेन ।
नीलोघट इत्यादौ नीलपदेन नीलत्वावच्छिन्नस्य घटपदेन घटत्वावच्छि
न्नस्य चोपस्थापनात् तादात्म्यस्य संसर्गमर्यादयाभानाच्च नीला-
भिन्नो घट इतिबोधा न्नीलपदप्रयोज्य नीलत्वावच्छिन्न विषयतानवच्छे
दक घटत्वावच्छिन्नत्वस्य तादृशविषयतानिरूपित तादात्म्यविषयता-
निरूपितत्वस्य च घटपदप्रयोज्य घटत्वावच्छिन्न विषयतायां सत्त्वा-

न्नीलपदेन घटपदस्य सामानाधिकरण्य मुपपन्नम । घटोघट इत्यत्र
सामानाधिकरण्य वारणार्थं स्वानवच्छेदक धर्मावच्छिन्नत्व निवेशः ।
राज्ञः पुरुष इत्यादौ सामानाधिकरण्य वारणार्थं द्वितीय सम्बन्ध नि
वेशः । "भिन्नप्रवृत्तिनिमित्तानां शब्दाना मेकस्मिन्नर्थे वृत्ति स्साम
नाधिकरण्य" मितिशाब्दिकलक्षणे, "भिन्नप्रवृत्तिनिमित्ताना" मित्यने-
न स्वानवच्छेदकेत्यादिप्रथमसम्बन्धस्य, "एकस्मिन्नर्थेवृत्ति" रित्य
नेन द्वितीयसम्बन्धस्यचलाभः । अभेदस्य संसर्गत्वाङ्गीकर्तृमते सं-
सर्गतया विशेषणविभक्ते रभेदार्थकत्वांगीकर्तृमतेच प्रकारतया तादा
त्म्यस्यभानं । एवंच नीलमुत्पलमित्यादौ नीलादिपदानां नीलगुणा-
दिमात्रवाचित्वे तत्तादात्म्यस्य उत्पलादिषुबाधिततया सामानाधि
करण्यानुपपत्ते र्नीलगुणादिविशिष्टवाचित्वमावश्यकम् । नीलगु-
णादिविशिष्टानां उत्पलादीनांच तादात्म्यस्याबाधिततया तत्रसामाना-
धिकरण्यनिर्वाहः ।

नच नीलादिपदानां नीलगुणादिविशिष्टे लक्षणाङ्गीकारेण सा-
मानाधिकरण्यनिर्वाहे तत्रशक्तिकल्पनमन्याय्यमितिवाच्यम् । अनु-
पपत्ति प्रतिसन्धानं विनैव नीलादिपदै र्बोधस्यानुभवसिद्धतया ल-
क्षणया निर्वाहासंभवात् । गामानयेत्यादौ क्वचि दानयनाद्यनुपपत्त्या
व्यक्ति लाक्षणिकत्वसंभवेपि गौरस्तीत्यादौ तादृशानुपपत्त्यभावेन ल
क्षणाया असम्भवाच्च । अधिक मन्यत्रानुसन्धेयं । तथा चापृथक्सिद्ध
विशेषण वाचिनां नीलगवादिशब्दानां विशेष्यपर्यन्तवाचित्ववच्छरीरवा
चिनामपि शब्दानां शरीरिपर्यन्त वाचित्वं शरीरस्य शरीरिणं प्रत्य-
पृथक्सिद्धत्वादेवासिद्ध्यति । अपृथक्सिद्धविशेषणत्वं च स्वानुयोगि-
क सम्बन्धविशिष्टस्वसम्बन्धेन किंचिद्विशिष्टत्वरूपं । सम्बन्धवैशिष्ट्यं
स्वप्रतियोगित्व स्वानधिकरणक्षणवृत्तित्व सम्बन्धावच्छिन्न स्वनिष्ठाव
च्छेदकताकप्रतियोगिताकभेदव त्त्वोभयसम्बन्धेन । नीलमुत्पलं
अयं गौरित्यादौ उत्पलगवादिवर्ति नीलादिगुण गोत्वादिजातीनां उ-
त्पल गवादिकंपरित्यज्या न्यत्रकदाचि त्क्वचिदपिसत्त्वासंभवेन नीलो-
त्पलादीनां गोत्वादीनां च संबन्धस्य यावन्नीलगुणगोत्वादिभावितया

नीलादिगुणगोत्वादिसंस्थानेषु उत्पला द्यनुयोगिकसंबन्धप्रतियोगित्वस्य
तादृशसंबन्धानधिकरण क्षणावृत्तित्व प्रयुक्त तादृश भेदस्यच सत्त्वेन
पूर्वोक्तोभयसंबंधेन उत्पला द्यनुयोगिक संबंधविशिष्टत्वस्य सत्वा
न्नीलादीनां गोत्वादीनांच उत्पलगवा द्यपृथक्सिद्ध विशेषणत्वमुपपन्नं ।
अत्रच संबन्धघटकतया स्वानधिकरणेत्यादि निवेशात्पुरुषाद्यनुयोगि
कसंयोगादिसंबन्ध प्रतियोगिनो दण्डादे र्नपुरुषाद्यपृथक्सिद्धविशेष
णत्वापत्तिः । दण्डादीनां पुरुषादिकं परित्यज्यान्यत्रापि वर्तमानतया
पुरुषाद्यनुयोगिक संबन्धानधिकरण क्षणेपि वर्तमानत्वात् । स्वप्रति
योगित्वनिवेशाच्च यादृशदण्डपुरुषसंयोगोत्पत्त्यनन्तरं तन्नाशात्पूर्वमे-
वच किंचिद्वस्तूत्पन्नविनष्टं, तादृश संबन्धानधिकरण क्षणवर्ति-
त्वाभावेन तादृशवस्तुनो नतादृशपुरुषा पृथक्सिद्धविशेषणत्वापत्तिः ।
नचैवं - घटस्य गगना पृथक्सिद्धविशेषणत्वापत्तिः, गगनानुयोगिक
घटप्रतियोगिक संयोगस्य यावद्घटसत्तमेव सत्त्वा त्तादृशसंयोगान-
धिकरण क्षणे घटस्यावर्तमानतया दर्शितोभयसंबन्धेन तादृशसंयोग-
रूप संबन्धविशिष्टत्वस्य सत्त्वादितिवाच्यम् । देशाद्देशान्तरापसारण
योग्ये घटे तत्तदपसारणभेदेन विभिन्नानामेव संयोगाना मुत्पत्त्या स्वा
नधिकरण क्षणवर्तित्व संबंधावच्छिन्न स्वनिष्ठावच्छेदकताक प्रतियो-
गिताक भेदवत्त्व संबन्धेन केनापिसंयोगेना विशिष्टत्वात् ।

नच -आकाशस्यैकत्वेन संयोगभेदो प्रामाणिक इतिवाच्यम् ।
आकाशस्यैकत्वेपि अवच्छेदकदेशभेदेन संयोगभेदस्यावश्यकत्वात् ।
वृक्षस्यानुयोगिन एकत्वे प्यग्रमूलाद्यवच्छेदकभेदेन संयोगभेदस्यप्रा-
माणिकत्वात् । यदिच्चयस्यघटादे रेकस्मिन्नेवदेशेवस्थितस्य उत्पत्तिविना-
शौ स्तः तादृशघटः प्रामाणिकः । तदा संबन्धे निष्कर्षक शब्दभि-
न्नशब्दप्रकृतिक मत्वर्थीयप्रत्यय प्रयोज्यविषयतानाश्रयत्वं विशेषणं दे-
यं । आकाशोघटवान् , दण्डीपुरुषइत्यादौ घटदण्डादि शब्दप्रकृतिकम-
त्वर्थीयप्रत्ययप्रयोज्य विषयताश्रयत्वस्य घटदण्डादि प्रतियोगिकसंयोगे
सत्त्वान्नतादृशसंबन्धविशिष्टत्व मादाय घटदण्डादीना मपृथक्सिद्धवि
शेषणत्वापत्तिः । नीलमुत्पलं अयंगौरित्यादौ नीलादिगुण गोत्वादिजा-

तिसंबन्धस्य मत्वर्थीयप्रत्ययप्रयोज्यत्वाभावा न्नानुपपत्तिः । उत्पलं नीलरूपवत् इयंगोत्ववतीत्यादौ नीलरूपगोत्वादिसम्बन्धस्य मत्वर्थीय प्रत्ययप्रयोज्यविषयताश्रयत्वा न्मत्वर्थीयप्रत्यये निष्कर्षकशब्दभिन्नशब्दप्रकृतिकत्वं विशेषणम् । अस्मिन् कल्पे स्वानाधिकरणेत्यादिसंबंधप्रवेशो प्यनावश्यकएव । एतादृशश्चापृथक्सिद्धविशेषणत्वं , शरीरिणं प्रति शरीरस्याप्यस्ति । तदेकधार्यत्वतदेकनियाम्यत्वादीनांशरीरसत्त्वेन तस्य तदपृथक्सिद्ध विशेषणत्वावश्यकत्वात । तदेकधार्यत्वादिकंचयावदात्मसद्भावं शरीरसत्त्वादात्मवियोगे शरीरनाशाच्चान्वयव्यतिरेकाभ्यामवगम्यते । नच – आत्मवियोगानन्तरमपि शरीरसद्भावान्नतदेकधार्यत्वप्रयुक्त तदपृथक्सिद्ध विशेषणत्व मितिवाच्यम् । आत्मवियोगक्षणएव शरीरविशरणारंभेण तदनन्तरं शरीराभावात , मृतशरीरे शरीरत्वव्यवहारस्य पूर्वं शरीरतया दृष्टस संघातैकदेशविषयत्वात ।

तथाच - श्रीभाष्यम् - "मृतशरीरन्तु चेतनवियोगक्षणएव विशरीतुमारब्धं क्षणान्तरे विशीर्यते" इति ।

एवंच शरीरिणंप्रत्यपि शरीरस्यापृथक्सिद्ध विशेषणत्वात् देवोहं मनुष्योहं देवोमनुष्यःपुरुषो योषित षण्ड आत्मा कर्मभिर्जात इत्यादा वहमात्मादिशब्दानां देवादिशरीरविशिष्टवाचित्वांगीकारेण देवादिशब्दै स्सामानाधिकरण्य मुपपन्नंभवति । अन्यथा देवत्वादीनां शरीरगतत्वेन तद्विशिष्टवाचिभि र्देवादिशब्दै रहमादिशब्दानां सामानाधिकरण्य मनुपपन्नंस्यात् । नच - देवोहंमनुष्योह मित्यादिव्यवहाराणां देहात्माभिमानमूलकतया देवादिशब्दानां शरीरमात्रवाचित्वेपि सामानाधिकरण्योपपत्ति रितिवाच्यम् । विशेषदर्शिभि रपि तथाव्यवह्रियमाणत्वेन देहात्माभिमानमूलकत्वा सम्भवात् । देवो मनुष्यः पुरुषो योषित् षण्ड आत्मा कर्मभि र्जात इत्यादौ कर्मभिरिति हेतुसंगतेश्च ।

नचैवमपि देवादिशब्दानां देवादिशरीरविशिष्टे लाक्षणिकतया सामानाधिकरण्य निर्वाहइतिवाच्यम् । अनुपपत्तिमप्रतिसन्दधतोपि पुरुषस्य तादृशवाक्या च्छाब्दबोधस्यानुभविकतया लक्षणाया असम्भवात् ।

नचैवं जातिगुणयोरिव व्यक्तिंप्रतिशरीरस्य शरीरिणं प्रत्यपृथक्सिद्ध विशेषणत्वे जातिव्यक्त्यो र्गुणगुणिनोरिव च शरीरशरीरिणोरपि सहोपलंभनियम स्स्यादिति वाच्यम् । सहोपलंभस्या पृथक्सिद्धत्वनियाम्यत्वाभावात । जातिव्यक्त्यो रुभयो रेकेन्द्रियवेद्यत्वेन तयोस्सहोपलंभेपि शरीरशरीरिणो स्तदभावेन सहोपलंभाभावोपपत्तेः ।

तथाच शरीरस्य शरीरिणं प्रत्यप्रथक्सिद्धविशेषणत्वेन शरीरवाचिनां शब्दानां शरीरविशिष्टवाचितया तैश्शब्दै रहमादिशब्दानां सामानाधिकरण्यं मुख्यमेवेतिसिद्धम् । इत्थंच कृत्स्नस्य चेतनाचेतनात्मकस्य प्रपंचस्य परमपुरुषशरीरत्वेन शरीरवाचिनां शब्दानां शरीरविशिष्टवाचकताया मुख्यतया कृत्स्नजगद्वाचिन स्सर्वशब्दस्यापि सर्वशरीरकपरमात्मवाचितया तेनसमं पुरुषशब्दस्य सामानाधिकरण्यं मुख्यमेवेति सिद्धम् ।

सर्वस्यजगतो ब्रह्मशरीरत्वं च श्रुतिस्मृत्यादिसिद्धं, तथाहि – वाजसनेयके माध्यंदिन शाखायां अन्तर्यामि ब्राह्मणे – " यःपृथिव्यान्तिष्ठ न्पृथिव्याअन्तरो यं पृथिवीनवेद यस्यपृथिवीशरीरं यःपृथिवीमन्तरोयमयति सतआत्मा न्तर्याम्यमृतः " इत्यादिना "यस्त्वचितिष्ठं स्त्वचोन्तरो यंत्वङ्नवेद यस्यत्वक्छरीरम् यस्त्वचमन्तरो यमयत्येषतआत्मान्तर्याम्यमृतः " इत्यन्तेन कृत्स्नस्यां चिद्वस्तुनो ब्रह्मरीरत्वं प्रतिपाद्य, " यआत्मनितिष्ठ न्नात्मनोन्तरो यमात्मा नवेद यस्यात्माशरीरं यआत्मान मन्तरो यमयति सतआत्मान्तर्याम्यमृतः " इति चिद्वस्तुनोपि परमपुरुषशरीरत्वं प्रत्यपादि ।

वाजसनेयक एव काण्वशाखायामन्तर्यामि ब्राह्मणे (बृहदारण्यके पंचमाध्याये षष्ठब्राह्मणे) प्येवमेव कृत्स्नस्य चिदचिद्वस्तुनः परब्रह्मशरीरत्वं प्रत्यपादि । परन्तु माध्यंदिनशाखागतस्य " यआत्मनितिष्ठन् " इत्यस्यस्थाने " योविज्ञा-

नेतिष्ठन् ” इतिभेदः । विज्ञानशब्दश्चात्रजीवात्मपरएव, स्थानप्रमाणात् । यथा “ तदेवाग्नि स्तद्वायु स्तत्सूर्य स्तदुचन्द्रमाः” इत्यत्रोकार एव कारस्थाने प्रयुक्तत्वात् एव कारार्थक स्तथात्राप्यात्मशब्दस्थाने विज्ञानशब्दस्य प्रयुक्तत्वाद्विज्ञानशब्दआत्मार्थकः ॥

एवं सुबालोपनिषदि - अष्टमखण्डे- “ यस्यपृथिवीशरीरम् ” इत्यारभ्य “ यस्यमृत्युश्शरीरंयो मृत्युमन्तरे संचरन्यं मृत्युर्नवेद सएषसर्वभूतान्तरात्मापहतपाप्मादिव्योदेव एकोनारायणः” इत्यन्तेन कृत्स्नस्य वस्तुनो ब्रह्मशरीरत्वं प्रत्यपादि ।

श्रीरामायणे - युद्धकाण्डे एकविंशत्युत्तरशततम १२१ - सर्गे- “ जगत्सर्वं शरीरन्ते ” इति कृत्स्नस्य जगतः परमपुरुषशरीरत्वमुक्तम् । श्रीविष्णुपुराणे- यदंबुवैष्णवः काय स्ततोविप्रवसुन्धरा । पद्माकारा समुद्भूता पर्वताब्ध्यादिसंयुता ” इति अप्छब्दवाच्यानां भूतसूक्ष्माणां विष्णुशरीरत्वं प्रत्यपादि । भूतसूक्ष्माणा मप्छब्दवाच्यत्वंच “पंचम्यामाहुता वापः पुरुषवचसोभवन्ति” इत्यत्रश्रुतौदृष्टम् । तत्रैव- “ तानिसर्वाणि तद्वपुः ।” इति “क्षत्सर्ववैहरेस्तनुः ।” इतिच कृत्स्नस्य जगतो ब्रह्मशरीरत्वमुक्तं । मनुस्मृतौ -“सोभिध्याय शरीरात्स्वा त्सिसृक्षुर्विविधाः प्रजाः” इत्यादौ चभगवच्छरीरत्वं जगतः प्रतिपन्नम् ।

तस्मात्कृत्स्नस्य जगतोब्रह्मशरीरतया तद्वाचिनस्सर्वशब्दस्य तच्छरीरक परमात्मपर्यन्तवाचितया तेन सह पुरुषशब्दस्य सामानाधिकरण्यं मुख्यमेवोपपन्नतरंभवति ।

ननु कर्मफलरूप सुखदुःखोपभोग साधनभूतेन्द्रियाश्रये पञ्चवृत्ति प्राणाधीनधारणे पृथिव्यादिभूतसंघातविशेषएव शरीरव्यवहारस्य लोकवेदयो र्दृष्टत्वा त्परमपुरुषस्यच “ अपहतपाप्मा विजरोविमृत्युः ” “ अनश्न न्नन्योअभिचाकशीति ” इत्यादिभिः कर्म तत्फलभोगयो रभावावधारणात् , “ अपाणिपादो जवनोगृहीता”

“ पश्यत्यचक्षुस्सशृणो त्यकर्णः ” इत्यादिभिस्तदीयभोगस्येन्द्रियानधीनत्वप्रतिपादनात, “ अप्राणो ह्यमनाः ” इत्यादिभिः प्राणवत्त्वनिषेधात , “ अशरीरं शरीरेषु ” इत्यादिभिश्शरीरवत्त्व प्रतिषेधाच्च कथं जगत ईश्वरशरीरत्वमिति चेन्न; वक्ष्यमाणरीत्या कृत्स्नस्य जगतो भगवच्छरीरत्वसंभवात् । तथाहि -शरीरशब्दस्तावद्घटपटादिशब्दवन्नैकाकारेष्वेव पदार्थेषु प्रयुज्यते, कृमि कीट पतंग सर्प नर पशु प्रभृतिष्वत्यन्तविभिन्नाकारेषु शरीरशब्दप्रयोगदर्शनात् , किन्तु विभिन्नाकारेषु नानापदार्थेष्वपि । व्यवहारानुगुण्येनच लक्षणं शिक्षणीयम्। व्यवहारश्च पूर्वोपदर्शितेषु कृमिकीटादिष्वन्यत्रच दरीदृश्यते । तेन यत्र यत्र लौकिको वैदिकश्च शरीरव्यवहार स्तत्सर्वसाधारणमेव शरीरलक्षणंतत्पदप्रवृत्तिनिमित्तंच वक्तव्यम् । तत्र नतावत् - कर्मफलोपभोगहेतुत्वंशरीरलक्षणम् , “ सएकधा भवति ” इत्यादिना प्रपंचिते मुक्तानां शरीरे तदसंभवात । नित्यशरीरेष्वव्याप्तेः । ईश्वरस्य इच्छाशरीरेष्वप्यव्याप्तेः , तेषां कर्मफलोपभोग निमित्तत्वाभावात । नापि भूतसंघातविशेषरूपत्वं, परमपुरुषेच्छा शरीरेष्वव्याप्तेः । “ न भूतसंघसंस्थानो देहोस्यपरमात्मनः ” इति भगवदिच्छाशरीरस्य भूतसंघातरूपत्वाभाव स्मरणात् । नापि पंचवृत्ति प्राणाधीनधारणत्वं , स्थावरशरीरेष्वव्याप्तेः । नाप्यन्त्यावयवित्वेसति चेष्टावत्त्वं तल्लक्षणम्। चेष्टाशब्देन क्रियामात्रविवक्षायां घटादावपि देवदत्तादिशरीरत्वापत्तेः, अहल्यादीनां शिलाकाष्ठादिशरीरेष्वव्याप्तेः। विजातीयक्रियाविवक्षणेनघटादिष्वतिव्याप्ति परिहारेप्यहल्यादि शरीरेष्वव्याप्ते र्दुर्वारत्वाच्च। नाप्यन्त्यावयवित्वेसतीन्द्रियाश्रयत्वं , समवायेनेन्द्रियवत्त्वविवक्षणेऽसंभवात्, इन्द्रियावयवेष्वतिव्याप्तेश्च । संयोगेन तद्विवक्षणे घटादिषु पूर्ववदतिव्याप्तेः । स्वजन्यज्ञानावच्छेदकत्व सम्बन्धेन तद्विवक्षणे चाहल्यादि शिलादिशरीरेष्वव्याप्तेः, ईश्वरस्यै च्छिकशरीरेष्वव्याप्तेः, ईश्वरज्ञानस्य नित्यत्वात । नाप्यन्त्यावयवित्वेसति भोगावच्छेदकत्वम् , वेश्मादावतिव्याप्तेः, शरीरस्येव वेश्मनोपि भोगावच्छेदकत्वात । स्वा

वयवातिरिक्त देशानवच्छिन्न भोगनिरूपितावच्छेदकता विवक्षणेन - शरीरावच्छिन्न भोगनिरूपितावच्छेदकतावतो वेश्मनोवारणे योगादिम हिम्नान्यशरीरं प्रविष्टं पुरुषं प्रति प्रविष्टशरीरस्य शरीरत्वापत्तेः । अधिकमन्यत्रानुसन्धेयम् । तस्मात् यस्य चेतनस्य यद्वस्थ मपृथक्सि द्धविशेषणद्रव्यं तत्तस्य शरीरमित्यादिरीत्या शरीरलक्षणं निर्वाच्यम्, तच्च ज्ञानावच्छिन्नानुयोगिताका पृथक्सिद्धि सम्बन्धनिरूपित द्रव्य त्वसमानाधिकरण प्रतियोगिताकत्व रूपं, स्वविशिष्टा पृथक्सिद्धि संबन्धनिरूपित द्रव्यत्वसमानाधिकरण प्रतियोगितासंबन्धेन किंचिद्वि शिष्टत्वपर्यवसितं । स्ववैशिष्ट्यं-स्वनिष्ठ ज्ञानावच्छिन्नानुयोगिताकत्वस्वीयज्ञानानुयोगिताकत्वान्यतरसम्बन्धेन । शरीरस्य शरीरिणं प्रत्यपृथ क्सिद्ध विशेषणत्वा जीवनिष्ठा नुयोगिताकापृथक्सिद्धि सम्बन्ध निरूपित प्रतियोगिताया श्शरीरे सत्त्वाल्लक्षणसमन्वयः । ज्ञानस्यापि जीवापृथक्सिद्ध विशेषणत्वा द्रव्यत्वाच्च तत्रातिप्रसंगवारणाय ज्ञाना वच्छिन्नत्वं अनुयोगिताविशेषणम् । स्वस्य स्वधर्मितावच्छेदकत्वव - वत्स्वप्रतियोगिक संबन्धानुयोगितावच्छेदकत्व स्याप्यनंगीकारा न्न दोषः । आत्मगत परिमाणादीना मात्मापृथक्सिद्ध विशेषणत्वा त्तद्वा रणाय द्रव्यत्वसामानाधिकरण्यं प्रतियोगिताविशेषणम् । सौभरिशरीरेष्व व्याप्तिवारणाय स्वनिष्ठ ज्ञानावच्छिन्नानुयोगिताकत्व स्वीयज्ञानानुयोगिता कत्वान्यतरस्य वैशिष्ट्यघटकतया प्रवेशः ।

एवं चैतादृशं शरीरत्वं भगवन्निरूपितं कृत्स्नस्या प्यस्तीतिनदोषः ॥

नच " अशरीरं शरीरेषु " इत्यादिभि र्निषेधा न्न भगवत श्शरीरसंभव इति वाच्यम् । निषेधस्य विहितव्यतिरिक्तार्थ एव प्रवृत्त्या कर्मकृत शरीरनिषेध परतयोपपत्ते र्दोषाभावात् ।

नच भगवत श्शरीरांगीकारे शरीर संबन्ध निबन्धन सुख दुःखादि प्रसंग इति वाच्यम् । सुखदुःखादीनां कर्मनिबन्धनत्वेन शरीरसद्भावेपि तदभावादेव तदप्रसक्तेः ।

तस्मात्कृत्स्नस्य जगतो ब्रह्मशरीरतया तदपृथक्सिद्धविशेषणत्वा

च्छरीरवाचिनां शब्दानां शरीरिपर्यन्तवाचित्वा त्सर्वशब्देन सर्वशरी रकपरमात्मनो बोधनात्तस्य पुरुषशब्दसामानाधिकरण्य मुपपन्नमित्यलम् ।

इदंच सर्वशरीरत्व निबन्धनं ब्रह्मण स्सर्वशब्दवाच्यत्वं बहुश्रुति स्मृति सम्प्रतिपन्नं । तथाहि - छान्दोग्येतावत् " सदेव सौम्येद मग्र आसीदेक मेवाद्वितीयम् " इति बहुत्वावस्थस्य विभक्तनामरूपस्य प्रत्यक्षतया दृश्यमानस्य कृत्स्नस्य जगतः सृष्टेः प्रागविभक्त नामरूपतया सच्छब्द वाच्य ब्रह्मात्मकतया तदभिन्नत्व मेकत्वंच प्रति पाद्य, " तदैक्षत बहुस्यां प्रजायेय " इत्यादिना - सच्छब्दवाच्यस्य पूर्वोक्तस्य ब्रह्मणः विचित्रानन्त चिदचिन्मिश्र व्यष्टि जगद्रूपेणाहं बहु स्यां, तदर्थं तेजोबन्नादि समष्टि रूपेणाह मेव प्रकर्षेण जायेयेति संकल्पपूर्वकं तेजः प्रभृति सृष्टिं प्रतिपाद्य, " सेयं देवतैक्षत हन्ताहमि मा स्तिस्रो देवता अनेन जीवेनात्मना नुप्रविश्य नामरूपे व्याकरवाणि " इत्यादिना - पूर्वोक्तस्य सच्छब्दवाच्यस्य परस्य ब्रह्मणःजीवशरीरक स्वात्मानुप्रवेश पूर्वक तेजोबन्नादिनामरूप व्याकरण संकल्पपूर्वकं संकल्पानुरोधेन तेजोबन्नादिषु जीवशरीरकस्वात्मानुप्रवेशः, तेषां नामरूपव्याकरणञ्च प्रत्यपादि । अत्र सच्छब्दवाच्यस्य परस्यब्रह्मणो लौकिक पित्रादिव न्नामव्याकर्तृत्व मनभिधाय जीवद्वारा तद नुप्रवेशपूर्वकं नामव्याकर्तृत्वाभिधानं अचिज्जीवविशिष्ट परमात्मन एव व्याक्रियमाण तत्तन्नामवाच्यत्वं ज्ञापयितुमित्यवगम्यते ।

तथा - तैत्तिरीयकेपि - " सोकामयत बहुस्यां प्रजायेय " इत्यादिना - आनन्दमयस्य परस्य ब्रह्मण स्स्वस्यैव बहुभवनसंकल्पपूर्वकं जगत्सृष्टिः, " तदनुप्रविश्य सच्च त्य च्चाभवत् " इत्यादिना - तदनुप्रवेशपूर्वकं तस्यैव सत्यच्छब्दवाच्यत्वंच प्रत्यपादि । तथाच भगवतस्स्वानुप्रवेशपूर्वक तत्तन्नामभाक्त्वस्य सर्वत्रापि प्रतिपादना त्सर्वे वाचका श्शब्दा अचिद्विशिष्ट जीवविशिष्ट परमात्म पर्यन्ताएव ॥

इदमेवाभिप्रेत्य श्रीभगवद्गीतासु - विश्वरूपदर्शनप्रकरणे - अर्जुनेन

" नमः पुरस्ता दथ पृष्ठत स्ते नमोस्तु ते सर्वत एव सर्व । "

इति भगवन्तं सर्वशब्देन संबोध्य,

"अनन्तवीर्यामितविक्रम स्त्वं सर्वं समाप्नोषि ततोसि सर्वः ॥"

इति भगवत स्सर्वशब्दवाच्यत्वं सर्वान्तर्यामित्व निबन्धनमिति स्फुटमेवोक्तम् ।

अतएव- " वेदैश्च सर्वै रहमेव वेद्यः । "
" वचसां वाच्य मुत्तमम् । "
" वाच्येहि वचसां प्रतिष्ठा । "
" सर्वे वेदा यत्पद मामनन्ति । "
" सर्ववेदा यत्रैकं भवन्ति "

इत्यादीनि प्रमाणानि भगवत स्सर्ववेदवेद्यत्वं सर्वशब्दवाच्यत्वंच प्रतिपादयन्तीति सर्व मनवद्यम् ।

इत्थंच-सर्वजगच्छरीरकं ब्रह्म पुरुषशब्दवाच्य नारायणाभिन्नमिति " पुरुषएवेद" मित्यादेः पर्यवसितोर्थः ।

केचित्तु सर्व-भूतभव्याद्यभिन्नं सर्वं जगत । पुरुषएव- पुरुषापृथक्सिद्ध विशेषण मेवेत्यर्थः । सामानाधिकरण्यस्थले अभेदापृथक्सिद्ध्यन्यतर सम्बन्धावच्छिन्न प्रकारता शालि बोधएवाभ्युपगम्यते, अन्यथा सर्वशब्दस्य सर्वशरीरक परमात्मपरता मंगीकृत्य तदेकदेशे सर्वस्मिन् भूतभविष्यतो रभेदेनान्वयांगीकारे संयोगावच्छिन्नक्रिया रूप गमनपदार्थैकदेश संयोगे गुणाभेदान्वय तात्पर्येण गमनं गुण इति व्यवहारवारणायाङ्गीकरणीयाया अभेदासम्बन्धावच्छिन्न प्रकारतानिरूपित विशेष्यतासम्बन्धेन शाब्दबोधं प्रति पदजन्योपस्थिते र्मुख्यविशेष्यतासम्बन्धेन कारणत्व मिति व्युत्पत्तेर्भंगापत्तेः । एवञ्च नीलो घ-

ट इत्यादौ नीलादिपदानां नीलगुणादि मात्रवाचित्वेपि सामानाधिकरण्योपपत्तिः, अपृथक्सिद्धिसम्बन्धेनैवान्वयसंभवात, इत्याहुः ।

परेतु सामानाधिकरण्यस्थले अभेदस्येवा पृथक्सिद्धेरपि संसर्गतामंगीकृत्या भेदापृथक्सिद्ध्यन्यतरसम्बन्धावच्छिन्न प्रकारता शालि बोधजनकत्वव्युत्पत्ति कल्पनया नीलो घट इत्यादौ सामानाधिकरण्य निर्वाहे आयुर्घृतम्, अग्निर्माणवकः इत्यादौ कारणत्व सादृश्यादीनामपि संसर्गतामंगीकृत्य तादृशान्यतमसम्बन्धावच्छिन्न प्रकारता शालि बोधजनकत्वव्युत्पत्तिकल्पनयैव तादृशस्थलेषु सामानाधिकरण्यनिर्वाह सम्भवेनग्रन्थकृतांतादृशस्थलेषु लक्षणाङ्गीकारो नोपपद्यते । समानविभक्तिक पद समभिव्याहारे अभेदातिरिक्तस्य संसर्गतया भानस्याप्रमाणिकत्वे अपृथक्सिद्धेरपि तथा भानानुपपत्तिः । तस्मा दभेदापृथक्सिद्ध्यन्यतरसम्बन्धावच्छिन्न प्रकारता शालि बोधजनकत्वव्युत्पत्तिकल्पनं न सम्भवति । एवंच सर्वपदार्थैकदेशे सर्वस्मिन्ने वाभेदसंबन्धेन भूतादीनामन्वयः । अभेदसंबन्धावच्छिन्न प्रकारता निरूपित विशेष्यतासंबन्धेन शाब्दबुद्धिं प्रति मुख्यविशेष्यतासम्बन्धेन पदजन्योपस्थितेः कारणत्व मिति व्युत्पत्तिभंगश्च न, मुख्यत्वस्या पृथक्सिद्धिसम्बन्धावच्छिन्न प्रकारताभिन्न प्रकारता विशिष्टान्यत्व रूपत्वांगीकारात । वैशिष्ट्यंच तादात्म्यावच्छिन्नत्वान्यतरसम्बन्धेन, इति प्राहुः ।

अत्रवदन्ति । द्रव्यम् घट इत्यादिस्थलेष्वनुभवानुरोधेना भेदस्य सर्संगतया भानांगीकारवत देवो मनुष्यः पुरुषो योपि दात्माकर्मभिर्जातः, अहं मनुरभवं सूर्यश्चेत्यादि स्थलेष्वनुभवानुरोधेना पृथक्सिद्धेरपि संसर्गतया भानांगीकारे बाधकाभावः । नच समानविभक्तिक पद समभिव्याहारस्थले ऽभेदातिरिक्तस्य संसर्गतया भानं न संभवति ,समानविभक्तिकत्वस्याभेदभान नियामकत्वादिति वाच्यम् । अनुभवानुरोधेन समानविभक्तिकत्वस्या भेदभाननियामकत्वव दपृथक्सिद्धिभानं प्रत्यपि नियामकत्वसंभवात । नचैवं व्यभिचारः, अन्यतरभानं प्रत्येव तस्य नियामकत्वांगीकारात । नच आयुर्घृतमित्यादावपि

समानविभक्तिकत्वसत्वा त्तद्भानापत्तिः , योग्यत्वाभावादेव तदसंभवात् । कारणत्वादीनां तादृशस्थलेषु संसर्गतयाभानकल्पनस्यच बहुतर प्रयोग विरहादेवासंभवात् । मुख्यत्वशरीरप्रविष्ट प्रकारतायां अपृथक्सिद्धिसंबन्धावच्छिन्नप्रकारताभिन्नत्वस्य प्रवेशेन तत्कल्पे गौरवाच्चेति ।

तच्चिन्त्यम् । भाष्यादिविरोधात् । अत्र विस्तरस्त्वन्यत्रानुसंधेयः ।

अन्येतु " पुरुष एवेदँ सर्वं " इति सामानाधिकरण्यं नियाम्यनियामकभावनिबन्धनं , तथाहि - ग्रामोयं देवदत्त इत्यादौहि - सामानाधिकरण्यं नाभेदनिवन्धनं; असम्भवात , किंतु नियाम्यनियामकभावनिबन्धनमेवेत्यङ्गीकार्यं, तथाच जगद्ब्रह्मणोरपि नियाम्यनियामकभावस्य " अन्तःप्रविष्ट श्शास्ता जनानाँ सर्वात्मा " यः पृथिव्यां तिष्ठन् , पृथिव्याअन्तरो , यं पृथिवी न वेद , यस्य पृथिवी शरीरम् " "यः पृथिवीमन्तरे सञ्चरन्यमयति" "एतस्यवा अक्षरस्य प्रशासने गार्गिसूर्याचन्द्रमसौ विधृतौ तिष्टतः " " भीषास्माद्वातः पवते " " ईश्वर स्सर्वभूतानां हृद्देशे र्जुन तिष्ठति । भ्रामयं त्सर्वभूतानि यन्त्रारूढानि मायया ॥ " इत्यादि बहुश्रुतिस्मृति सिद्धत्वा त्तद्वाचिशब्दयो स्सामानाधिकरण्यम् तन्निबन्धनमेव । एवंच सर्वपदार्थे सर्वास्मिन् पुरुषशब्दवाच्यस्य नियाम्यत्वसम्बन्धेनान्वया त्पुरुषनियाम्यम् सर्वमिद मिति बोधः । पुरुषाधीनमित्यर्थः । इदंच सामानाधिकरण्यं यत्र सर्वात्मना नियाम्यनियामकभावविवक्षा तत्रैव । एवंच क्वचित्तदभावेपि न क्षतिः । इत्थंच परमपुरुषस्य सकलजगन्नियामकत्वरूपो गुणविशेषोऽनेन वाक्येन प्रतिपादितो भवति, इति वदन्ति ।

इतरेतु - मृदयम् घटः, पानीयं प्राणिनां प्राणाः, इत्यादिषु कार्यकारणभाव निबन्धनस्यापि सामानाधिकरण्यस्य दृष्टत्वा दत्रापि जगद्ब्रह्मणोः कार्यकारणभाव निबन्धनमेव तद्वाचिशब्दयो स्सामानाधिकरण्यम् । " सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत " इति श्रुतौ सर्वं खल्विदं ब्रह्मेति जगद्ब्रह्मवाचिशब्दयो स्सामानाधिकरण्यस्य कार्यकारणभाव निबन्धनत्वं " तज्जलानि " तिहेतूपन्यासेन स्थापितम् । अतएव " ज्योतींषि विष्णुर्भुवनानि विष्णु र्वनानि विष्णु र्गिरयोदिशश्च । " इत्यादयोप्युपपद्यन्ते । इत्याहुः ।

एषु सर्वेषु यदुक्तं संप्रदायसिद्धंच तद्ग्राह्यं विद्वद्भिरिति विरम्यते ।

एतेन भगवतो लीलाविभूतियोगोऽप्युक्तोभवति ।

अथ नित्यविभूतियोग मप्याह – (उतामृतत्वस्येशानइति)

उतेत्यर्थान्तरे, किंचेत्यर्थः । अमृतत्वस्य–नित्यमुक्तानां । "मोक्षे नित्येमृते देवे कीर्तितं त्वमृतं बुधैः" इति निघण्टुः । स्वार्थिकोबाहुळकः प्रत्ययः । ईशानः- नियन्ता । व्याप्ति र्धारणंच नियमनान्तर्गते । तदुभयं - " अन्तः प्रविष्टश्शास्ता जनानाँ सर्वात्मा" " य आत्मनितिष्ठ न्नात्मनोन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरोयमयति " इत्यादिश्रुतिसिद्धं ।

चतुर्मुखानन्दा दुत्तरोत्तरं शतगुणितानन्दानां नित्यानां मुक्तानां च नियन्तुरस्य कियदिद मनाद्यनन्त संसारिमण्डलाधिपत्य मित्याह (यदन्नेनातिरोहतीति) अन्नेन – अदनीयेन । यत संसारिमण्डलम् । अतिरोहति – स्वकारणमतीत्य रोहति , देवतिर्यङ्मनुष्यस्थावरादिरूपेण प्रादुर्भवति । तत्कियदिति शेषः ।

अथवा । यत - आत्मजातं । अन्नेन - अहरहरशितेन । अतिरोहति - पूर्वपूर्वबाल्यकौमाराद्यवस्था अतीत्य वर्धते । " अन्नाद्भूतानिजायन्ते । जातान्यन्नेन वर्धन्ते । " इति श्रुतेः । तस्येति शेषः । तस्यभूतजातस्य । अमृतत्वस्य - सायुज्यादिचतुर्विधमोक्षस्य । ईशानः - प्रदाता भवतीत्यर्थः । तथाच मोक्षधर्मे पुरुषसूक्तप्रकरणे पठ्यते –

" अन्नाज्जातस्य भूतस्य मनुष्यादेरकारणात ।
निर्वाणदायी भवति कृपया पुरुषोत्तमः ॥ " इति

यद्वा - अमृतत्वस्य - परमपदस्य । न विद्यते मृतत्वं यत्र तद
मृतत्वम् । विकाररहित्यस्यापीदमुपलक्षणं । तस्य परमपदस्य । ईशा
नः - स्वामी । परमपदं विशिनष्टि - (यदन्नेनेत्यादि) यत -परमपदं ।
अन्नेन - परब्रह्मणा, भोग्यजातेनवा । अद्यत इत्यत्र मिति व्युत्पत्त्यान्न
शब्दो ब्रह्मणोपि वाचकः, परब्रह्मणः परमभोग्यत्वेन सर्वेषा मदनीय
त्वात् । अतिरोहति - अत्यन्तं नित्यापूर्वमिव प्रादुर्भवति । अति - अ-
तिक्रम्य, लीलाविभूतिमतिक्रम्य । रोहति - प्रकाशतइतिवा, अर्थः ॥
इति बोध्यम् ॥

यत्तु - ईशानशब्दश्शिवपरः, तस्य शिवे रूढत्वात ; स्वामि-
त्वविशिष्टे तस्य योगशक्तिसद्भावेपि योगार्थरूढ्यर्थयोर्मध्ये रूढ्यर्थ
स्यैव प्रथममुन्मेषेण रुद्रत्वावच्छिन्न बोधस्यावश्यकत्वात् । अतएव -
" वर्षासुरथकारोग्नीनादधीत " इत्यत्र रथकारपदस्य, रथकारत्वरूप
जात्यवच्छिन्न परत्वं स्वीकृतंमीमांसकैरिति; तन्न, अत्रेशानपदस्य
रुद्रत्वावच्छिन्नबोधकत्वे " अमृतत्वस्य " इति षष्ठयन्तार्थस्यान्वयानुप
पत्त्या, स्वामित्वविशिष्टबोधकताया एवावश्यकत्वात् ·। नहि ईशान
पदरूढि शक्यतावच्छेदकावच्छिन्ने रुद्रे अमृतत्वशब्दार्थ मोक्षाद्यन्वि
त षष्ठयर्थान्वयस्सम्भवति ।

अथ - ईशानपदस्य, केवलरूढत्वांगीकारे तत्रामृतत्वस्येति ष-
ष्ठयन्तार्थान्वयासम्भवेपि तस्य योगरूढत्वांगीकारे न कोपि दोषः ।
योगशक्यतावच्छेदकंच स्वामित्वम् । तच्च रूढिशक्यतावच्छेदकरुद्र
त्वावच्छिन्ने तत्पदोपस्थितएवान्वेति । तथाच पंकजादिशब्दैः पंक-
जनिकर्तृत्वविशिष्ट पद्मत्वावच्छिन्न बोधव दीशानशब्देन स्वामित्ववि-
शिष्ट रुद्रत्वावच्छिन्नबोधस्सुलभएव । एवंच रूढ्यर्थविशेषणीभूते यो
गार्थे स्वामित्वरूपे ससम्बन्धिक पदार्थएवामृतत्वस्येति षष्ठयन्तार्थस्य-
अन्वयसम्भवादमृतत्वनिरूपित स्वामित्वविशिष्टो रुद्रइति बोध इति
नानुपपत्तिलेशोपि । नच स्वामित्वस्य पदार्थैकदेशतया तत्र पदार्था
न्तरस्य नान्वयसम्भवः, गोत्वे नित्यत्वान्वयतात्पर्येण प्रयुक्तस्य गौ

र्नित्येति वाक्यस्य साधुतावारणाय कल्पनीयायाः किंचिन्निष्ठप्रकारता
निरूपित विशेष्यतासम्बन्धेन शाब्दबोधंप्रति पदजन्यपदार्थोपस्थितेर्मु
ख्यविशेष्यतासम्बन्धेन कारणत्वमित्याकाराया व्युत्पत्ते र्भंगापत्तेरिति
वाच्यम् ; चैत्रस्य गुरुकुलमित्यादौ पदार्थैकदेश गुर्वादिना चैत्राद्यन्व
यदर्शनेन किंचिन्निष्ठप्रकारतानिरूपित ससम्बन्धिकान्यपदार्थनिष्ठविशे
ष्यतासम्बन्धेन शाब्दबोधं प्रत्येव मुख्यविशेष्यतासम्बन्धेन पदजन्य
पदार्थोपस्थितेः कारणतायाः कल्पनीयतया स्वामित्वस्य ससम्बन्धि
कपदार्थत्वेन तत्रामृतत्वस्येति पदार्थान्वये प्युक्त व्युत्पत्तिभंगाभावात् ।
इति चेन्न ; अमृतत्वस्येति स्वामित्वप्रतिसम्बन्धिवाचक पदसमभिव्या-
हृतत्वे नात्रत्येशानपदस्य रूढिज्ञानासम्भवेन तत्पदरूढ्यर्थतावच्छेद·
कावच्छिन्नस्य रुद्रस्योपस्थित्यसम्भवेन तद्बोधासम्भवात् ; तत्पदविशे-
ष्यक रूढिशक्तिमत्ताज्ञानं प्रति तत्पदे तत्पदयोगशक्यतावच्छेदकनिष्ठ
विशेष्यतानिरूपित स्वार्थनिष्ठप्रकारताशालि बोधजनकत्व प्रकारक
तात्पर्यप्रयोज्यपद समभिव्याहृतत्वज्ञानस्य प्रतिबन्धकत्वात् । नाभि-
पंकजं, मुखपंकजं, स्वर्णपंकजं, इत्यादिस्थलेषु पंकजादिपदयोगा
र्थानुन्मेषनिर्वाहाय तत्पदविशेष्यक योगशक्तिज्ञानं प्रति तत्पदे तत्प
दयोगार्थनिष्ठाभाव प्रतियोग्यर्थ वाचकपदाव्यवहितोत्तरत्व ज्ञान
त्वेन प्रतिबन्धकतायाइव पंपासरोरुहं पद्मं, कमलंगांगपंकजम् , पद्मा
नियस्या ग्रसरोरुहाणि प्राबोधयन्नूर्ध्वमुखैर्मयूखै, रित्यादौ सरोरुहपंक
जादिशब्दरूढ्यर्थानुन्मेषनिर्वाहाय उक्तज्ञानप्रतिबन्धकताया अप्यव-
श्यकल्पनीयत्वात् ।

नचैवं - " इदिपरमैश्वर्ये " इति धातोर्निष्पन्नस्य परमैश्वर्यविशि
ष्ट शचीपतित्वावच्छिन्ने योगरूढस्येन्द्रशब्दस्य सुरेन्द्रो देवेन्द्रइत्यादि
लौकिकव्यवहारेषु " ततः कदाचिद्देवेन्द्रः " इत्यादिस्थलेषु महाभा
रतेच इन्द्रशब्दयोगार्थपरमैश्वर्य प्रतिसम्बन्धिवाचक देवादिशब्दसमभि
व्याहारेण प्रयोगेप्यन्वयबोधदर्शने नोक्तप्रतिबद्ध्य प्रतिबन्धकभावक
ल्पनानुपपत्तिरिति वाच्यम् ; तादृशस्थलेषु नरेन्द्रो राक्षसेन्द्रइत्यादा
विवे न्द्रशब्दस्य केवलयौगिकत्वे नेश्वरत्वावच्छिन्न मात्रार्थकतयोक्त

प्रतिबध्यप्रतिबन्धकभावकल्पनायां बाधकाभावेन प्रकृते योगरूढत्वे नांगीकृतेशानपदार्थैकदेशे ऽमृतत्वस्येति षष्ठ्यन्तार्थान्वय बोधासम्भवात् ।

किञ्च डोप्रत्ययाद्यन्तगम्यादिधातुभ्यो निष्पन्नानां गमनकर्तृत्वविशिष्ट गोत्वावच्छिन्नादिषु योगरूढानां गोभानुधेन्वादिशब्दानां योगार्थे गमनादौ पादकरणकत्वाद्यन्वय बोधतात्पर्येण पद्भिर्गौः, रश्मिभिर्भानुः, वत्सस्य धेनुः, जनानां चन्द्रः, इत्यादिप्रयोगवारणाय कल्पनीयायाः किंचिन्निष्ठप्रकारता निरूपित विशेष्यता सम्बन्धेन शाब्द-बोधं प्रति पदविशिष्टान्यविषयतासम्बधेनोपस्थितेः कारणत्वमित्याकारया व्युत्पत्तेर्भंगापत्त्याचेशानपदरूढ्यर्थ विशेषणीभूतयोगार्थेऽमृतत्वस्येति षष्ठ्यन्तार्थान्वयो नसम्भवति । पद वैशिष्ट्यं स्वनिरूपित रूढिशक्यतावच्छेदकावच्छिन्न विशेष्यतानिरूपितत्व स्वीययोगार्थनिष्ठत्वोभय सम्ब-न्धेन । गवादिशब्द योगार्थ गमनादीनां ससम्बन्धिकपदार्थत्वेन चैत्रस्य-गुरुकुलमित्यादाविव किंचिन्निष्ठप्रकारतानिरूपित विशेष्यतासम्बन्धेन-शाब्दबोधं प्रतिमुख्यविशेष्यतासम्बन्धेन पदजन्यपदार्थोपस्थितेः कारण-त्वमित्याकारकार्यकारणभाव भंगप्रसंगाभावेन गवादिशब्दार्थ गमनादिषु-पदकरणकत्वाद्यन्वयस्य बाधकाभावेनोक्तव्युत्पत्तिकल्पनस्या वश्यक-त्वाच्च ।

अतएव शारीरक प्रथमाध्याय तृतीयपादस्थं प्रमिताधिकरणं सं-गच्छते । अन्यथा तत्पदयोगार्थप्रतिसम्बन्धिवाचक पद समभिव्याहारेपि तत्पदरूढ्यर्थोन्मेषमंगीकृत्य रूढ्यर्थ विशेषणयोगार्थे प्रतिसम्बन्धिवाचक पदान्तरार्थस्यान्वयांगीकारे "ईशानो भूतभव्यस्य" इत्यस्मिन्वाक्ये भूतभव्यरूपस्येशान पदयोगार्थ प्रतिसम्बन्धिन उपादानेपीशानपदरूढ्यर्थोन्मेषसम्भवेन ततएवेशानपदश्रुत्या तादृशवाक्यस्य ब्रह्मपरत्वनिर्णयसम्भवेन तादृशाभिधानश्रुतिविरुद्धेनांगुष्ठप्रमितत्वरूप लिंगेन तादृशवाक्यस्य जीवपरत्वशंकाया असम्भवेन तदधिकरणपूर्वपक्षानुत्थितेस्तादृशाधिकरणासांगत्यापत्तेः । उक्तप्रतिबद्ध्यप्रतिबन्धक भावांगीकारेच तत्रत्येशानपदस्य केवलयौगिकत्वावश्यकतया योगार्थस्यैश्वर्यस्य

जीवसाधारण्यशंकया पूर्वपक्षोत्थितिसम्भवेन तदधिकरणोत्थितिसंगतेः ।

नच – तत्रत्येशानशब्दस्य केवलयौगिकत्वांगीकारे तस्याभिधानश्रुतित्वाभावेनांगुष्ठप्रमितत्वलिंगेन प्राप्ताया जीवपरत्वशंकाया भूतभव्येशितृत्वरूपलिंगमात्रेणैव निराकर्तव्यतया " शब्दादेव " इत्यस्यासंगतिः, शब्दपदेन " अन्तस्तद्धर्मोपदेशात् " इत्यादाविव भूतभव्ये शितृत्वरूप लिंगप्रतिपादक वाक्यविवक्षणेपि प्रथमश्रुतस्य जीवपरत्वोपपादकांगुष्ठप्रमितत्वरूप लिंगस्य चरमश्रुतेन भूतभव्येशितृत्वरूपलिंगेन बाधासम्भवेनाधिकरणासंगतेरिति वाच्यम्; जीवस्य " आराग्रमात्रोह्यवरोपिदृष्टः " " वालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीव स्सविज्ञेय स्सचानन्त्यायकल्पते ॥ " इत्यादिष्वणुपरिमाणप्रतिपादनेन स्वाभाविकस्यांगुष्ठप्रमितत्वस्य जीवेबाधिततया औपाधिकस्यच्च जीवइव ब्रह्मण्यपि सम्भवेनांगुष्ठप्रमितत्वस्य जीवमात्रसाधारण्याभावेन तादृशलिंगस्य दुर्बलतया भूतभव्येशितृत्वरूपस्य चरमश्रुतस्यापि ब्रह्मलिंगस्य जीवादिसाधारण्याभावेन ब्रह्ममात्रसाधारणतया निष्प्रतिद्वन्द्वत्वेन बलीयस्त्वा त्सजातीयेष्वपि प्रबलेन दुर्बलस्य बाधसम्भवाच्च चरमश्रुतेनापि निरुपाधिकभूतभव्ये शितृत्वलिंगेन प्रथमश्रुतस्याप्यगुंष्ठप्रमितत्वलिंगस्य बाधाच्चरमश्रुतेन तेन लिंगेन ब्रह्मपरत्वनिर्णयसम्भवेनाधिकरणासांगत्याभावात् ।

नच्चैवमंगुष्ठप्रमितत्वस्य जीवासाधारणलिंगत्वाभावे उक्ताधिकरणपूर्वपक्षानुत्थितिरिति वाच्यं; पूर्वपक्षदशायां " अंगुष्ठमात्रो रवितुल्यरूपः । " " अंगुष्ठमात्रं पुरुषं निश्चकर्षयमोबलात । " इत्यादि श्रुतिस्मृतिषु तस्य-जीवधर्मत्वनिर्देशेन जीवासाधारणलिंगता भ्रमेण पूर्वपक्षोत्थानस्य – यथाश्रुतेसम्भवात् ।

यच्चात्र रथकाराधिकरणन्यायेन योगार्थरूढ्यर्थयोर्मध्ये रूढ्यर्थस्य प्रथमनुपस्थितिवर्णनं ; तन्न " वर्षासुरथकारोग्नीनादधीत " इत्यत्र रूढ्यर्थो न्मेषप्रतिबन्धकाभावेन रूढ्या रथकारप

दस्यात्रैवर्णिक रथकारत्वावच्छिन्न बोधकत्वेपि प्रकृते रूढिज्ञानप्रतिब न्धकसद्भावेन तदुन्मेषस्यैवासम्भवेनात्र तन्न्यायप्रसरासम्भवात। किञ्च – रथकाराधिकरणे न केवलं रूढिमात्राद्रथकारपदस्यात्रैवर्णिकपर त्वनिश्चयः, किन्तु योगार्थ परत्व विरोधिसंवलिततया रूढ्यैव, एवंच प्रकृते योगार्थपरत्वविरोधिनः कस्यचिदप्यभावान्न केवलया रूढ्यायोगार्थपरत्वाभावसम्भवः। रथकाराधिकरणेहि - "वचनाद्रथकारस्याधानेस्य सर्वशेषत्वात" ॥ ६-१-४४ ॥ इति प्रथमतो रथकारपदस्यात्रैवर्णिकपरत्वं सिद्धान्तसिद्धमुपक्षिप्य, ततश्च "न्याय्योवाकर्मसंयोगा च्छूद्रस्य प्रतिषिद्धत्वात्" ॥ ६ - १ - ४५ ॥ इति पुनः पूर्वपक्षमुपस्थाप्य, "अकर्मत्वात्तु नैवंस्यात" ॥ ६ - १ - ४६ ॥ "आनर्थक्यंच संयोगात्" ॥ ६-१-४७ ॥ इति सूत्रद्वयेन ब्राह्मणादिषु त्रैवर्णिकेषु रथकारपदयोगार्थस्य रथकर्तृत्वस्य शिल्पोपजीवनप्रतिषेधेन प्रतिषिद्धत्वात, ब्राह्मणादीनां वसन्तादिकालस्य नियततया तेषां वर्षाकालविधानानर्थक्याच्च, रथकारो त्रैवर्णिकोऽशूद्रः कश्चिदिति निर्णीतम्।

तस्मान्नेशानपदस्य शिवपरत्वमत्र सम्भवदुक्तिकम्।

किंच "सहस्रशीर्षा पुरुषः।" इतिपुरुषशब्दवाच्यं नारायणं प्रस्तुत्य तस्यैव गुणकथनाय प्रवृत्तेस्मिन्वाक्ये रुद्रस्यकः प्रसंगः। येनेशानपदस्य तत्परत्वसम्भवासम्भवाशंकापि स्यात्। तस्मादुतामृतत्वस्येत्यादेर्यथोक्तएवार्थः। अधिकमन्यत्रद्रष्टव्यम्।

तृतीया ऋक्।

एतावा॑नस्य महि॒मा। अतो॒ज्याया॑ँश्च॒ पुरु॑षः।
पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑। त्रि॒पाद॑स्या॒मृतं॑ दि॒वि ॥३॥

सहस्रशीर्षा इत्यादिनोक्तं सर्वं मनुवदति (एतावा नस्य महिमेति) अस्य- परम पुरुषस्य। महिमा - वैभवम्। एतावान् - इयत्। इत्यर्थः। नचपरमपुरुषमहिम्नो ऽपरिच्छिन्नत्वा त्कथ मत्र परिच्छिन्नत्वो

क्ति रितिवाच्यम्। अपरिच्छिन्नत्वेन परिच्छेदस्यैव विवक्षितत्वात्।

अतः- अपरिच्छिन्न ज्ञानशक्त्यादि मत्त्वसर्वान्तर्यामित्व उभयविभूतिमत्त्व रूपाद्धेतोः। पुरुषः - नारायणः। ज्यायान्-श्रेष्ठः, सर्वस्मा त्परइतियावत्। च शब्दोवधारणे; ज्यायानेवेत्यर्थः। यथोक्तं-गीतासु- "द्वाविमौ पुरुषौलोके क्षरश्चाक्षरएवच। क्षर स्सर्वाणि भूतानि कूटस्थोक्षरउच्यते॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोक त्रय माविश्य बिभर्त्यव्यय ईश्वरः॥ यस्मा त्क्षरमतीतोह मक्षरादपि चोत्तमः। अतोस्मि लोके वेदेच प्रथितः पुरुषोत्तमः॥" इति।

अथवा अस्य-परिदृश्यमानस्य सचराचरस्य प्रपंचस्य। महिमा-वैभवं। एतावान् - इयान्, परिच्छिन्नइत्यर्थः। फलितमाह (अतोज्यायाँश्च पुरुषः इति) अतः- अस्मात्प्रपंचात्। पुरुषः-नारायणः। ज्यायान्-महीयान्, अपरिच्छिन्नइत्यर्थः। उपबृंहित श्चायमर्थोहरिवंशे "ब्रह्माण्डेभ्योखिलेभ्यश्च भूतजातेभ्य एवच। ब्रह्मादि देवसंघेभ्यो ज्यायानेवजनार्दनः।" इति।

अस्य ज्यायस्त्व मेव प्रपंचयति "पादोस्य विश्वाभूतानि" इत्यादिना। अस्य - परमपुरुषस्य। विश्वा भूतानि - सर्वाणि भूतानि, अचित्संसृष्ट स्सर्वोपि जीवइत्यर्थः। भूतशब्दस्या चित्संसृष्टजीवपर त्वात्। पादः- तुरीयांशः। दिवि-परमव्योमशब्दवाच्ये - समस्त समष्टि तत्वबहिर्भूता प्राकृतस्थानविशेषरूपे परमपदे। अमृतं-जरामरणादिरहितं नित्यवस्तुजातं। अस्य- परमपुरुषस्य। त्रिपात - पादत्रयम्। भोग्यभोगोपकरण भोगस्थानरूपस्य त्रिविधस्य वस्तुनः परमपदे सत्त्वा त्तेषां पादत्रयत्वेन व्यपदेशः। यद्वा - जगदन्तर्गत वस्त्वभिमानिनामस्त्रभूषणादिरूपाणां नित्यानां, भगवदनुभवमात्रपराणां नित्यानां, मुक्तानाम्, च परमपदे सत्त्वा त्तेषां वा त्रिपात्त्वेन व्यपदेशः।

अथवा-(पादोस्य विश्वाभूतानि) विश्वाभूतानि - सर्वाणिभूतानि। अस्य परमपुरुषस्य। पादः-भगवदाश्रयाया स्सृष्ट्यादिशक्ते रेकदेशः परम पुरुषशक्तिलेशविजृंभित मिदंजगदितिभावः। आहचभगवान्

पराशरः - " यस्या युतायुतांशांशे विश्वसृष्टिरियंस्थिता ॥ " इति (त्रिपादस्यामृतंदिवि) अस्य त्रिपात - अधिकांशः । अमृतं-अमरणधर्मकं-नित्यमुक्तरूपं । दिवि-परमव्योम्नि । भासतइतिशेषः । " जागृवाँस स्समिन्धते " इतिश्रुतेः । " द्युशब्दःपरमव्योम्नि स्वर्गेवियति कथ्यते ।' इति निघण्टुः ॥ यद्वा -, (त्रिपादस्यामृतंदिवि) त्रयः पादा यस्य तत्त्रिपात्, त्रिशब्दो बह्वर्थपरः, पादशब्दो गुणपरः, अनन्तज्ञानानन्दादि गुणविशिष्टमित्यर्थः । अस्य परमपुरुषस्य । अमृतं - अविनाशिरूपं । दिवि - परमव्योम्नि । भासतइति शेषः ॥

यद्वा-(पादोस्यविश्वाभूतानि) अस्य-वासुदेवसंकर्षण प्रद्युम्नानिरुद्धाख्यचतुर्व्यूहात्मकस्य परमपुरुषस्य । पादः - तुरीयोभागोनिरुद्धाभिधानः । विश्वाभूतानि - सर्वभूत सृष्टिकर्तृत्वा त्सर्वभूताभिन्नः । कार्यकारणभाव निबन्धनस्य सामानाधिकरण्यव्यपदेशस्य पूर्वोपदर्शित प्रकारेण सम्भवात । अस्य। त्रिपात्-वासुदेव संकर्षण प्रद्युम्नाख्यभागत्रयविशिष्टं । अमृतं-अविनश्वरं रूपं । दिवि-नाकपृष्ठे । निवसतीतिशेषः ।

चतुर्थी ऋक् ।

त्रिपादूर्ध्व उदैत्पुरुषः । पादोस्येहाभवात्पुनः ।
ततोविष्वङ्व्यक्रामत । साशनानशनेअभि ॥ ४ ॥

एवं विभूतिद्वययोग उक्तः । अथ सकलजगत्स्रष्टृत्वरूपं गुणविशेषं-प्रतिपादयिष्यन् उक्तार्थमनुवदति " त्रिरूपादूर्ध्वं उदैत्पुरुष " इत्यादिना । त्रिपात् - अपरिच्छिन्न ज्ञानशक्त्यादिमान्, वासुदेवसंकर्षणप्रद्युम्नरूपः, नित्यमुक्तादिभिः परिचर्यमाणोवा पुरुषः । ऊर्ध्वं - प्रकृतिमण्डलादुपरिष्टा त्परमव्योम्नि वैकुण्ठे । उदैत - उद्गच्छत । " यतोवाचोनिवर्तन्ते । अप्राप्यमनसासह । " " सो अंगवेदयदिवानवेद " इत्याद्युक्तरीत्या वाङ्मनसा परिच्छेद्योभूदिति यावत ।

इदंच वक्ष्यमाणस्य सकलजगत्स्रष्टृत्वस्य केवलकृपामात्रकार्यत्वप्रकटीकरणार्थमुक्तम् । अवाङ्मनसगोचरस्या परिच्छिन्नज्ञानशक्त्यादिमत उभयविभूतिनायकस्य जगत्स्रष्टृत्वंहि न स्वप्रयोजनाय भवति, नापिवा ऽन्यनियमनाधीनम् ।

एवं सर्वप्रकारपरिपूर्ण स्समाभ्यधिकरहितोपि भगवा न्निर्हेतुकयैव कृपया सकलजगद्रक्षणार्थ मिहावतीर्ण इत्याह (पादोस्येहाभवात्पुन इति) अस्य - चतुर्व्यूहात्मकस्य सर्वशेषिणः परमपुरुषस्य । पादः - अनिरुद्धाख्यो व्यूहचतुष्टयान्तर्गत स्तुरीयोभागः । पुनः - वासुदेवादीनामनन्तरं । इह - लीलाविभूतौ । अभवात - आविर्भूत, अवातरदित्यर्थः ।

तदुक्तं श्रीवैकुण्ठसंहितायां—

" सचादि पुरुषोविष्णु स्सर्वव्यापी सनातनः ।
शरीरात्स्वा ज्जगत्त्रातुं संकर्षण मभावयत् ॥
सचसंकर्षणो देवः प्रद्युम्नं समभावयत् ।
सचप्रद्युम्न संज्ञस्स न्ननिरुद्ध मभावयत् ॥
तस्माद्ब्रह्मासमुत्पन्नो जगत्स्रष्टुंचराचरम् ।
एवंचतुर्धासंव्यूह्य स्वात्मानं पुरुषोत्तमः ॥
अण्डेभ्यःपरतोनित्यं त्रिपादेन विराजते ।
जगत्सृष्ट्यादिकर्माणि कर्तुकामस्स्वलीलया ॥ "

इति ॥

अथ, अनिरुद्धात्मा स भगवान् जगत्सृष्ट्यनुकूलं संकल्प मकरोदित्याह (ततोविष्वङ्व्यक्रामदिति) सचानिरुद्धः । ततः-योग निद्रावसाने । विष्वक् - समन्तात् । व्यक्रामत - स्वसंकल्पेन समाक्रान्तवान् । स्रष्टव्यवस्तुविषयकं "सोकामयत बहुस्यां प्रजायेयेति" " तदैक्षत बहुस्यां प्रजायेयेति " "सेयं देवतैक्षत" इत्याद्युक्तप्रकारेण स्वस्यैव तत्तद्रूपेण बहुभवनसंकल्प मकरोदित्यर्थः । अथ कानि तानि

यद्रूपेण स्वस्य बहुभवनसंकल्प मकरोदित्यत्राह (साशनानशने अ
भीति) साशनं - जंगमम् , देवमनुष्यादिरूपं ; अनशनम् - स्था
वरम् , वृक्षगुल्मलतादिरूपम् ; ते स्थावरजंगमे । अभि - उद्दिश्य,
विष्वङ्व्यक्रामदिति पूर्वेणान्वयः । स्थावरजंगमात्मक कृत्स्नजगद्रूपेण
स्वस्य बहुभवनसंकल्प मकरोदित्यर्थः ।

पञ्चमी ऋक् ।

तस्माद्विराडजायत । विराजो अधिपुरुषः ।
सजातोअत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥ ५ ॥

अथाद्वारकमहदादिसृष्टिमाह ।

(तस्मा द्विराडजायतेति) तस्मात् - संकल्पाद्धेतोः । विराट्-
महदादिरूपेण विविधं राजतइति विराट् , प्रकृतिः। अजायत -महदा
द्यण्डपर्यन्तरूपेणाजायत ॥

अथ सद्वारकसृष्टिं वक्तुं द्वारभूत चतुर्मुख सृष्टिमाह
(विराजो अधिपुरुषइति) विराजः - अण्डपर्यन्तप्रकृतिमण्डलस्य ।
अधि - अनन्तरम् । पुरुषः - चतुर्मुखः । अजायते
त्यनुषज्यते । तथाच मनुः - " सोभिध्याय शरीरात्स्वा त्सिसृक्षु
र्विविधाः प्रजाः । अपएव ससर्जादौ तासु वीर्यमपासृजत् । त
दण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन् जज्ञे स्वयं ब्रह्मा स
र्वलोकपितामहः ॥ " इति ।

केचिदाहुः-बहुभवन संकल्पानन्तरं न केवलं संकल्पमात्रेण सृष्टिः,
किन्तु सद्वारकापीत्याह (तस्मा द्विराडजायतेति) तस्मात - परमपुरु
षात् । विराट् - विशेषेण राजतइतिविराट् , परमपुरुषः ॥ अ-
जायत - अनिरुद्धरूपेणावतीर्णोभूदित्यर्थः । तदुक्तंमोक्षधर्मे-" ईश्व
रोहि जगत्स्रष्टा विभुर्नारायणोविराट् । अनिरुद्धइति प्रोक्त श्चांशानां
प्रभवाप्यये ॥ " इति । अथविराज श्चतुर्मुखो त्पत्तिमाह (विराजोअधि

पुरुष इति) विराजः- विराट्पुरुषा दनिरुद्धात् । अधि पुरुषः - अधि
कारपुरुषश्चतुर्मुखः । अजायतेत्यस्यानुषङ्गः ॥ इति ।

अथ चतुर्मुखस्य जगत्स्रष्टृत्वानु गुणशरीराभिवृद्धिमाह (सजातो
ऽत्यरिच्यतेति) सः - चतुर्मुखः । जातस्सन् । अत्यरिच्यत-
भगवत्कृपया प्रवृद्धकायोभवत् , येनातिमहदपि वस्त सुखेन कर्तुं शक्नु
यात् । शरीरवृद्धिमेव दर्शयति (पश्चाद्भूमिमथोपुरइति) पश्चाद्भूमिं-भूमिप
श्चात् , भूमेरध इत्यर्थः । अथो-भूमि - पुरः-भूमेरूर्ध्वंच । अथोशब्द
श्चार्थकः । अत्यरिच्यतेति पूर्वेणान्वयः ।

केचित्तु " सजातो अत्यरिच्यत- पश्चाद्भूमि मथोपुरः " इ
त्यनयो रेव मर्थं वर्णयन्ति -- सः - विराट्पुरुषो ऽनिरुद्धः । जा-
तः - प्रादुर्भूतस्सन् । अत्यरिच्यत - व्यापकोभूत । पश्चाद्भूमि
मथोपुरः - भूमे रन्त र्बहिश्चेत्यर्थः । भूमिशब्दोत्रा ण्डपर्यन्तस्योप
लक्षणम् । इति ॥

षष्ठीऋक् ।

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।
वसंतोअस्यासीदाज्यं । ग्रीष्मइध्मश्शरद्धविः ॥ ६ ॥

अथ स जात श्चतुर्मुख स्स्वयं जग त्सृष्टि मजानानो भगव
दुपदिष्टमार्गेण भगवन्त मात्मसमर्पणरूपेण मानसयागेना राध्य
तत्प्रसादल्लब्धविज्ञानो जगत्सृष्टि मकरोदिति वक्तुं प्रथमतो भगवदाराधना
त्मकं यागं प्रस्तौति ।

(यत्पुरुषेण हविषा - देवायज्ञमतन्वत । इत्यादि) यत् - य
दा , यस्मिन् काले । पुरुषेण - चतुर्मुखात्मकेन । हविषा । दे-
वाः - तदिन्द्रियाणि । यज्ञं - मानसं ध्यानरूपम् । अतन्वत - कृ
तवन्तः । तदेत्यध्याहारः । तदा - तस्मिन् काले । अस्य -
ध्यानमयस्य यज्ञस्य । वसन्तः - वसन्तकालः । आज्यमासीत्-

आज्यत्वेन ध्यात आसीदिति यावत् । वसन्तकालस्याज्यप्रचुरत्वेन त स्याज्यत्वेन ध्यानं कृतमासीदिति भावः । तथाच पाद्मे- " हिम दग्ध तृणाभूमि वसन्ते शोभते तृणैः । गावश्चतृणभक्ष्येण दु- ह्यन्ते सुतरां तदा ॥ " इति ।

ग्रीष्मः - ग्रीष्मकालः । इध्मः - इध्मत्वेन ध्यात आसीदि त्यर्थः । " ग्रीष्मकाले पलाशेध्मान् हविष्यन्ति महर्षयः । येच संवत्सरं सत्रमासतेभवशान्तये ॥ " इत्यादिभि ग्रीष्मकालस्य समि त्प्रचुरत्वावगमा त्सएवे ध्मत्वेन ध्यातआसीदितिभावः । शरत् - श रत्कालः । हविः - पुरोडाशाख्यं हवि रासीत , तत्त्वेनध्यात आ सीदित्यर्थः । शरत्कालस्य सस्य प्रचुरत्वा त्सएव पुरोडाशत्वेन ध्यात आसीदिति बोध्यम् ।

सप्तमी ऋक् ।

सप्तास्यांसन्परिधयः । त्रिस्सप्त समिधः कृताः ।

देवायद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् ॥ ७ ॥

अस्य - यज्ञस्य । परिधयः - परितो धीयन्तइति परिधयः । आहवनीयादीनां त्रिषु पार्श्वेषु प्रथममेखलाया उपरि निधीयमानानि मेखलापरिमितायामानि काष्ठानि परिधयउच्यन्ते । सप्त - आसन् । नत्रयएव ॥ " उ- त्तरवेदिपरिधयस्त्रयः , आहवनीयस्य त्रयः , आदित्यस्सप्तमः । " इति शतपथोक्तप्रकारेण सप्तसंख्याकाः परिधय आसन्नित्यर्थः ।

यद्यपि "वसन्तोस्य " इत्यादिषु आज्यादित्वेन ध्याता वसन्ता दय इतिव दत्र ' परिधित्वेन एते ध्याता ' इति नोक्तम् , तथापि जग त्सृष्टेः पूर्वं वर्तमानानां सप्तसंख्याकानां पदार्थानामेव तेन रूपेण ध्येयत्वस्या वश्यकत्वेन पृथिव्यप्तेजोवाय्वाकाशाहंकारबुद्धयएव परिशषो त्परिधित्वेन ध्याता आसन्नित्यवधेयम् ।

(त्रिस्सप्तसमिधः कृता इति) अस्येत्यनुषज्यते । अस्य-यज्ञस्य । त्रि स्सप्त त्रिगुणितसप्तसंख्याः, एकविंशतिसंख्याका इत्यर्थः । समिधः -अग्ने

र्दीप्तिसाधनभूतानि काष्ठानि । कृताः । पंचज्ञानेन्द्रियाणि-पंचकर्मेन्द्रियाणि चेतिदश ; एकादशं मनः; पंचतन्मात्राः पंचमहाभूतानि चेति दश ; मिळित्वा एकविंशतिसंख्याका इन्द्रियादयएव ज्ञानभोगाद्युद्दीपनहेतु भूताः परमात्माग्निसमुद्दीपनहेतुत्वेन ध्याता इति बोध्यम् । (देवा यद्यज्ञं तन्वाना इति) देवाः - इन्द्रियाणि, साध्याख्याश्च । यत् - यदा । यज्ञं - देवतोद्देशेन द्रव्यत्यागरूपं । तन्वानाः - कुर्वन्तस्स न्तः । पुरुषं - चतुर्मुखाख्यम् । पशुं - पशुस्थानीयम् । अबध्नन् - हृदयाख्ये यूपे - अध्यवसायरूपया रशनया- अनन्यगतिं चक्रुः । मूलप्रकृतौ यूपे - भगवदाज्ञारूपया रशनया- न्ययुंजन्नितिवा ।

अष्टमीऋक् ।

तंयज्ञंबर्हिषिप्रौक्षन् । पुरुषंजातमग्रतः ।

तेन देवाअयजन्त । साध्याऋषयश्चये ॥ ८ ॥

(तं यज्ञमित्यादि) तदे त्यध्याहार्यम् । तदा - तस्मिन्काले । तं - ब्रह्माख्यं । यज्ञं - यजन्त्यनेनेति यज्ञः, यजनीयहवीरूपमित्यर्थः । ब र्हिषि - प्रकृतौ । निधायेत्यध्याहार्यम् । प्रौक्षन् - प्रोक्षणसंस्कारमकुर्व न् । इदंच उपस्तरणावदानाभिघारणादीनाम प्युपलक्षणम् , ते- षामपि द्रव्य त्याग योग्यता पादक संस्कारत्वात । प्रकृतेचानन्यार्हत्वा नुसन्धानादिकमेव प्रोक्षणादिस्थानीयं बोध्यम् ॥

कुतएवं सर्वं मानसिकमेव क्रियत इत्याकांक्षां शमयन्नेव पशुं- विशिनष्टि (पुरुषं जातमित्यादि) अग्रतः - अण्डान्तर्गत स्थिरचरादि सृष्टेः प्राक्काले । जातं - उत्पन्नम् । पुरुषमिति यज्ञमित्यनेन सम्बध्य ते । तथाच-यतः पश्चादिसृष्टेः प्रागेवायं यज्ञः प्रवृत्त स्ततएव मानसं सर्वमक्रियतेति भावः । अत्रच - "तमग्रतो जातं यज्ञं यष्ट- व्यम् बर्हिषि प्रकृतौ निधाय साध्या देवाः प्रौक्षन् " इत्यादि योग रत्नवचन मनुसन्धेयम् ।

(तेनेत्यादि) तेन - ब्रह्मरूपेण हविषा । देवाः - इन्द्रियाणि । अयजन्त - यागमकुर्वन् । अनिरुद्धाग्नौ ब्रह्मरूपं हविः प्रक्षिप्तवन्त इत्यर्थः । आत्मसमर्पणमकुर्वन्निति भावः । (साध्याऋषयश्चये) साध्याः - कर्मसाधनानि वागादींद्रियाणि । ऋषयः - ज्ञानसाधनानि चक्षुरादींद्रियाणि । ये-साध्या ऋषयश्च-ते देवा स्तेनायजन्तेत्यन्वयः । " ओमित्यात्मानं युञ्जीतैतद्वै महोपनिषदं " इत्युक्तरीत्याऽऽत्मसमर्पणरूपं यज्ञं ऋत्विक्स्थानीया ब्रह्मण इन्द्रियरूपा देवा भगवदुद्देशेन जगत्सृष्टिकामनयाऽकुर्वन्निति भावः ।

अयंच प्रकारः शाकल्यब्राह्मणे पुरुषसूक्तव्याख्याने प्रपंचितः । यथा - " तस्मात्पादनारायणा न्मूलप्रकृतिरजायत । सा प्रकृतिः पादनारायणशासना न्महदहंकारादीन् सूक्ष्मान्पदार्थानजनयत् । एवं सूक्ष्मायां सृष्टौ कृतायां स पादनारायण स्स्थूल सृष्टयर्थं चतुर्मुखं पुरुष मभिदध्यौ । तद्ध्यानात्पश्चा त्पुरुष श्चतुर्मुखाख्योऽजायत । सजातो भूमेः पश्चा त्पुरतश्चात्यरिच्यत । स र्वकार्यक्षमो वृद्धकाय स्स न्पुरुष स्तूष्णीमास । त मनिरुद्धनारायणो प्राक्षीत , ब्रह्मं स्तूष्णीं भवसीति । अज्ञानादिति होवाच । ब्रह्मं स्तवन्द्रियाणि देवा नृत्विजः कृत्वा त्वदीयंच कळेबरं हविः कृत्वा मां हविर्भुजं ध्यात्वा मय्यग्नौ निवेदय । मदंगस्पर्शमात्रेण जगत्कोशभूत स्त्वत्कायो बृंहिष्यते । तस्मा दुद्भूतानि प्राणिजातानि यथापुरं निर्माय स्रष्टा भविष्यसि । यएवं सृष्टियज्ञं जानाति सजन्मनीह मुक्तोभवति ॥ " इति ।

नवमीऋक् ।

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॑ः । संभृ॑तंपृषदा॒ज्यं ।
प॒शूँस्ताँश्च॑क्रेवाय॒व्या॑न् । आ॒र॒ण्यान्ग्रा॒म्याश्च॒ये ॥ ९ ।

अथोक्तप्रकारेण यज्ञेनाराधिता त्परमपुरुषा ल्लब्धसृष्टयनुकूलज्ञानशक्त्यादिक श्चतुर्मुखो यथापूर्वं जगत्ससृजेत्याह (तस्माद्यज्ञादि

त्यादि) सर्वहुतः - सर्वं जुहोतीति सर्वहुत् , तस्मात् - सर्वं भगवते समर्पितवतइत्यर्थः । स्वीयसर्वभरं भगवति समर्पितवतइतियावत । अथवा - जीवात्मनः कौस्तुभस्थानीयस्य अत्युत्तमतया तमेवानर्घतमं समर्पितवतानेन सर्वं समर्पितप्रायमिति तात्पर्येण सर्वहुतइत्युक्तिः । यद्वा - सर्वशब्दवाच्यं भगवन्त मुद्दिश्य अनेन यागकरणा त्सर्वाय जुहोतीति सर्वहुत् इतिव्युत्पत्त्या सर्वहुच्छब्दो भगवदुद्देश्यकात्मसमर्पणरूपयागकर्तरि चतुर्मुखे वर्तते । तथाच सर्वहुत इत्यस्य तादृशयागकर्तुरित्येवार्थः । यज्ञात - यजनीयात् । तस्मात - एतादृशा च्चतुर्मुखात् । पृषदाज्यम् - दधिमिश्रमाज्यम् , दधिमिश्राज्यस्थानीयम् तद्वद्विचित्ररूपं सृज्यवस्तु जननहेतुभूतं शुक्लनीलादि विचित्रवर्णं वस्तु । संभृतम् - उत्पन्नं । " सृज्यप्राणिजननहेतुभूतं विचित्रवर्णवीर्यं पृषदाज्यंभवति। " इति योगरत्ने ।

केचित्तु वाक्यद्वय मिदं जग त्सृष्टिपरं नानुमन्यन्ते , किंतु - पूर्वोक्तसृष्टियज्ञपरमेव । तदात्वेचा स्यवाक्यद्वय स्यैव मर्थोबोध्यः । सर्वहुतः - सर्वहोमाधिष्ठानभूतात, सर्वं हूयतेऽस्मिन्निति वा, सर्वायहूयतेस्मिन्निति वा सर्वहुच्छब्द स्तादृशयज्ञपरः । तस्मात - तादृशात् । यज्ञात् - यज्ञार्थं । प्रयोजनस्य हेतुत्वविवक्षयात्रपंचमी , अध्ययनाद्वसतीतिवत् । पृषदाज्यं - दधिमिश्र माज्यम् । संभृतं - संपादितं, कल्पितमित्यर्थः । इति । (पशूँस्ताँश्चक्रेवायव्यानिति) अथ चतुर्मुखः । वायव्यान् - वायुमार्गसंचरणशीलान् , पक्षिरूपानित्यर्थः । पशून् चक्रे । आरण्यान् - अरण्येभवान् । येग्राम्याः - ग्रामेभवाः । ताँश्च । चक्र इति पूर्वेणान्वयः । अरण्यस्थान् ग्रामस्थाँश्च पक्षिग स्ससर्जेत्यर्थः । यद्वा - वायव्यांश्चक्रे - वायुपथसंचारिणः पक्षिण श्चक्रे । आरण्यान् पशून् - श्वापदादीन् सप्त । येचग्राम्यास्तान् - मेषादीन् सप्तपशूंश्च । चक्रे । आरण्यग्राम्यभेदेन चतुर्दशसंख्याः पशवश्च श्रुतिप्रसिद्धाः । " सप्तग्राम्याः पशवस्स प्तार इति । तेच विष्णुपुराणे प्रथमांशे पञ्चमाध्याये प्रपंचिताः-

"गौरजः पुरुषोमेष श्वाश्वाश्वतरगर्दभाः ।
एतान्ग्राम्यान्पशूनाहु रारण्यांश्च निबोधमे ॥ ५१ ॥
श्वापदा द्विखुरा हस्ति वानराः पक्षिपंचमाः ।
औदकाः पशवष्षष्ठा स्सप्तमाश्चसरस्रिपाः ॥५२ ॥ " इति ॥

अत्र 'आरण्याग्राम्याश्चये' इति शाखान्तरेपाठः । तदाच ये आर
ण्याः, येच ग्राम्याः, तान् - द्विविधानपि पशन् , चक्र इत्यन्व
योबोध्यः ।

दशमी ऋक् ।

तस्मांद्यज्ञात्सर्वहुतः ऋचस्सामांनिजज्ञिरे ।
छन्दाँसिजज्ञिरेतस्मांत् यजुस्तस्मांदजायत ॥१० ॥

अथ यज्ञसृष्टिं तदनुगुण तदनुष्ठातृ ब्राह्मणादिसृष्टिं तदाराध्या
ग्नींद्रादिदेवतासृष्टिं तत्फलभोगस्थान स्वर्गादिसृष्टिंच वक्ष्यन् पु-
नश्चतुर्मुखस्य तादृशसृष्ट्यनुगुण शक्त्याधायकं प्रपत्तिरूपं मानस
याग मनुवदति । (तस्माद्यज्ञात्सर्वहुत इति) अर्थः पूर्ववदे-
व । ऋचः - ऋग्वेदाः , एकविंशति शाखाः । सामानि - सा
मवेदाः , सहस्रशाखाः । जज्ञिरे - उत्पन्नाः , तत्सर्गीय प्रथमोच्चारण
विषयत्वरूपा मुत्पत्तिं प्रापुः ॥

तस्मात् - चतुर्मुखात् । छन्दांसि - गायत्र्यादीनि । जज्ञिरे -
पूर्वोक्तएवार्थः । तस्मात् । यजुः - नवाधिकशतशाखो यजुर्वेदः ।
अजायत , यथोक्तएवार्थः । यद्यपि - "यो ब्रह्माणं विदधातिपूर्वं
योवैवेदांश्च प्रहिणोति तस्मै ॥ " इति श्रुत्या परमपुरुषस्यैव प्रथम
प्रवर्तकत्वा द्वेदानां तत्सर्गीय चतुर्मुखकर्तृक प्राथमिकोच्चारणविषय
त्वरूपं चतुर्मुखजन्यत्व मसम्भवि । तथापीतरसापेक्षोच्चारणेषु प्राथ-
मिकत्वस्य विवक्षितत्वा न्न दोषः ।

केचित्तु 'तस्मादि 'त्यादिकं परमपुरुषपरमेव वर्णयन्ति , त-
दा चैवमर्थः । तस्मात्-पूर्वोक्तयज्ञप्रतीतात् । यज्ञात्-यज्ञशब्दवाच्यात् ।

'यज्ञोवैविष्णुः ' इतिहि श्रुतिः । सर्वहुतः - सर्वं हूयतेस्मा
इति सर्वहुत् , तस्मात् । सर्वविधद्रव्यरयागजन्य फलभाजइत्यर्थः ।
" अहंहिं सर्वयज्ञानां भोक्ताच प्रभुरेवच " इति हि गीतम् । सर्वं
हूयत इतिवा सर्वहुत् , तस्मात् - पशुपुत्रादिसर्वविध फलाभिला-
षिकर्तृकाग्नींद्रादिसर्वदेवतोद्देश्यक यज्ञाराध्यादित्यर्थः । " येप्यन्य
देवता भक्ता यजन्ते श्रद्धयान्विताः । तेपि मामेव कौन्तेय यजन्त्य-
विधिपूर्वकम् " इतिहि भगवता गीतम् । तादृशात्परमपुरुषात ।
ऋचस्सामानिजज्ञिर इत्यन्वयः । अत्रच कल्पे तत्तत्सर्गीयप्राथमिकोच्चा
रणाविषयत्वरूपोत्पत्ति स्सुखमेव वेदानां सम्पद्यते , भगवतैव प्रथ
मत श्चतुर्मुखम्प्रत्युपदेशा द्वेदानां तदुत्पन्नत्वोपपत्तेः ।

अत्रेदमवधेयम् ।

यद्यपि शब्दरूपस्य वेदस्य देवदत्तादिशब्दानामिव तत्तदुच्चा
रणभेदेन भिन्नतया कण्ठताल्वाद्यभिघातजन्यतया सादित्व मावश्य-
कम् । उच्चारणक्षणानन्तरकाले श्रावणप्रत्यक्षाभावेन तस्य विनाशाव
श्यकतया नित्यत्वानुपपत्तिश्च । वर्णनित्यत्वपक्षमाश्रित्य वेदस्य नि
त्यत्वानादित्वा द्युपपादनेच्च देवदत्तादिशब्दानामपि तथात्वापत्ति र्दुर्वा
रा । सुगतकणादादिवाक्यानामपि वेदव द्वर्णनित्यत्वप्रयुक्तानादित्व
नित्यत्वादिमत्तया पौरुषेयत्वाऽनित्यत्वादिप्रयुक्ता ऽप्रामाण्या नुपपत्तिश्च ।
इति वेदस्य प्रागभावाप्रतियोगित्वरूपं स्वरूपतोऽ नादित्वं ध्वंसाप्रति
योगित्वरूपं स्वरूपतो नित्यत्वंचा सम्भवीति तत्रानादित्वानित्यत्वादिव्यव
हारो नोपपद्यते ।

तथापि - अनादित्व नित्यत्वादि व्यवहारस्य प्रवाह-
तो ऽ नादित्व प्रवाहतो नित्यत्वादि विषयतया नानुपप-
त्तिः । प्रवाहतोनादित्वंच स्व समानजातीय शब्दा समान काली
न प्रागभावाप्रतियोगित्वं । प्रवाहतो नित्यत्वंच स्व समानजातीय-
शब्दा समानकालीन ध्वंसाप्रतियोगित्वं । उभयत्रापि शब्दे स्वस
मानजातीयत्वं स्ववृ त्त्यानुपूर्वीवत्त्व रूपं, आनुपूर्वी तत्तदुच्चारणभेद

भिन्नेषु सर्वेष्वपि शब्देषु घकारोत्तराकारोत्तर टकारोत्तराकार
त्वादि रूपानुग तैकैव । तत्तदुच्चारणभेदेन आनुपूर्वीभेदेतु स्ववृत्त्या
नुपूर्वी सजातीयानुपूर्वी मत्त्वमेव साजात्यम् ।

नच - एतादृशानादित्व नित्यत्वयो रनादित्वनित्यत्व व्यवहारनिया
मकत्व मप्रामाणिक मिति वाच्यम् । घटादिशब्दे ष्वनादिनित्यत्व-
व्यवहारस्य देवदत्तादिशब्देषु तादृशव्यवहाराभावस्यच निर्वाहाय
उक्तरूपयोर प्यनादित्व नित्यत्वयोः तादृशव्यवहारनियामकताया-
स्सर्वैरभ्युपगन्तव्यत्वात , अन्यथा घटादिशब्देष्वपि देवदत्तादिशब्दे
ष्विव स्वरूपतोऽनादित्व नित्यत्वयो रसम्भवेन तथा व्यवहारानुपत्तेः ।

एवंच यथा गवादिशब्दाना मनादिकालत एकविधानुपूर्वीवि-
शिष्टस्य शब्दस्यान्ततो नित्यमुक्तेश्वरादि व्यवहारेष्वेव प्रसिद्ध्या
सर्वस्यापि कालस्य तादृशशब्दाधिकरणत्वेन तादृशशब्दा समा
नकालीन गवादिशब्द प्रागभावध्वंसा द्यप्रसिद्ध्या तेषां शब्दाना
मनादित्व नित्यत्वयोरुपपत्तिः । देवदत्तादिशब्दानांच एकादशेहनि
पितानाम कुर्यात इत्युक्तरीत्या यत्किंचित्कालविशेषावच्छेदेन पुरुष
विशेषेण वस्तुविशेषमात्रे संकेतिततया तादृश संकेत करणा त्पूर्वं-
तादृश नाशोत्तरंच तादृशशब्दसमानकालीन तत्प्रागभाव तद्ध्वंस-
योः प्रसिद्ध्या तदभावोपपत्तिश्च । तथा वेदानामपि प्रतिकल्पं
समानानुपूर्वीकानामेव सर्वदैव भगवत्साक्षात्कार विषयाणां भगवतैव
सर्गादौ चतुर्मुखायोपदेशा द्यथोक्त मनादित्वं नित्यत्वंच तेषाम-
प्युपपन्नमेवेति न तादृशव्यवहारानुपपत्तिः । पूर्वानुपूर्वी विजातीया
नुपूर्वीप्रणयन पूर्वकं केनचि त्स्वतन्त्र पुरुषेण प्रवर्तितत्वाभावाच्चापौ
रुषेयत्वोपपत्तिः ।

अथवा - वेदादि नित्यत्वं उच्चारण विशिष्टान्योच्चारण विषय-
त्वाभावः । उच्चारणवैशिष्ट्यं स्वीय क्रम सजातीय क्रमवत्त्व स्वो
त्तरत्वो भयसम्बन्धेन । पित्रादि कर्तृक देवदत्तादि शब्दीय प्राथ-
मिको च्चारणस्य काळिदासादिकर्तृक रघुवंशादि प्रथमोच्चारणस्य
च तादृशो च्चारणविषयत्वा न्न नित्यत्वम् । वेदोच्चारणस्यच सर्व
स्य उच्चारण विशिष्टतया वेदस्य नित्यत्वोपपत्तिश्च ।

नन्वेव मपि द्वितीया द्युच्चारण विषय देवदत्तादिशब्दानां प्र-
थमोच्चारण विषय शब्दापेक्षया भिन्नतया तेषां नित्यत्वापत्ति रि-
ति वाच्यम् । तादृशोच्चारण विषयतावच्छेदक जात्यभाव-
स्यैव तथात्वात् ।

यद्वा - स्वोच्चारणत्व व्यापको च्चारण विशिष्टत्वकत्व मेव
नित्यत्वं , वैशिष्ट्यं पूर्वोक्तोभयसम्बन्धे नैव । देवदत्तादि शब्दीय
प्राथमिकोच्चारणे उच्चारण वैशिष्ट्याभावा न्न तेषां नित्यत्वम् ।
वेदोच्चारणेषु सर्वत्र तत्सत्वा द्वेदस्य नित्यत्वोपपत्तिश्च ।

अनुगृहीतंच भगवता भाष्यकृता - देवताधिकरणश्रीभाष्ये -

" एतदेवच वेदस्या पौरुषेयत्वं नित्यत्वंच , य त्पूर्व पूर्व क्र
मजनित संस्कारेण तमेव क्रमविशेषं स्मृत्वा तेनैव क्रमेणो च्चा
र्यत्वम् , त दस्मासु सर्वेश्वरेपि समानम् , इयां स्तु विशे-
षः , संस्कारा नपेक्षमेव स्वयमेवा नुसन्धत्ते पुरुषोत्तमः " इति ।
अत्र यद्यपि पूर्व क्रम जनित संस्कारजन्य स्मृतिप्रयोज्यो च्चारण
विषयत्वं लब्धम् । तथापि भगवदुच्चारणस्य संस्कारादिनिरपे-
क्षत्व कथना त्तत्परित्यागः । अत्र तेनैव क्रमेणोच्चार्यत्व मित्येव
कारेणा स्म दुक्त व्यापकत्वलाभो बोध्यः ।

श्रुतप्रकाशिकायामपि -

" अतो वेद नित्यत्वं नाम प्रत्युच्चारणं पूर्वपूर्व क्रमसुसदृशा
नुपूर्वी विशिष्टतयो च्चार्यमाणत्वम् " इति ।

अत्र यद्यपि पूर्व पूर्व क्रम सुसदृशानुपूर्वी विशिष्टतये त्यने
न क्रमस्य शब्द निष्ठत्व मवगम्यते । तथापि एतदेवचे त्यादि
भाष्यव्याख्यानावसरे " तस्मादुच्चारणगतः क्रम इति तै रभ्युपेत्यम् ,
उच्चारणंतू त्पत्तिविनाशव देवेति क्रमनित्यत्व मप्यनुपपन्नम् , त-
स्मा त्पूर्वपूर्वोच्चारण क्रमविशेषो यादृश स्तादृशेनैव क्रमेणो त्त-
रोत्तरमुच्चार्यत्वं नित्यत्व मित्यस्मदभिमतमेव तैरपि स्वीकर्तव्यं "

इत्यादि श्रुतप्रकाशिका श्रीसूक्त्यनुरोधेनो च्चारणगतः क्रमएवात्रापि विवक्षित इति निश्चीयते । अत्रच प्रत्युच्चारण मित्यनेन अस्मदुक्त व्यापकत्वलाभो बोध्यः ।

नचैवं वेदस्य गवादि शब्दतुल्यत्वापत्ति रिति वाच्यम् । इष्टत्वात् , लोके व्यवह्रियमाणानां गवादिशब्दानामपिहि वेदघटकता सर्वसम्प्रतिपन्ना । अतएवच सर्वस्य भूतजातस्य वेदशब्देभ्यएव नामनिर्माणं स्मर्यते ।

" सर्वेषान्तु स नामानि कर्माणि च पृथ क्पृथक् ।
वेद शब्देभ्य एवा दौ पृथ क्संस्थाश्च निर्ममे ॥ " इति ।
" नाम रूपं च भूतानां कृत्यानां च प्रपंचनम् ।
वेदशब्देभ्य एवादौ देवादीनां चकारसः ॥ " इतिच ।

तस्मा द्वेदस्या नादित्वं नित्यत्व मपौरुषेयत्वं चोपपन्नतरमिति ॥

एकादशीऋक् ।

तस्मा दश्वा अजायन्त । एकेचो भयादतः ।
गावोंह जज्ञिरे तस्मात् । तस्मा ज्जाता अजावयः ॥

वेदसृष्टि कथना त्तत्प्रतिपाद्यस्य यज्ञस्यापि सृष्टि रुक्ता भवतीति अथयज्ञोपयोगि पदार्थ सृष्टि माह (तस्मादित्यादिना) तस्मात् - ब्रह्मणः । अश्वाः - तुरगाः । अजायन्त - उत्पन्नाः । उभया दतः- उभयतो दन्ताः , ऊर्ध्वाधोभागयो रुभयोरपि दन्तवन्तः । येकेच येकेचि द्वानररासभादयस्सन्ति । तेप्यजायन्तेत्यर्थः । उभया दतइति छान्दसो दीर्घः । अथैकतोदतां सृष्टिमाह (गावोह जज्ञिरे तस्मा दित्यादि) तस्मात् । गावः - धेनवः । जज्ञिरे । हशब्दः पादपूरणार्थः । तस्मात् । अजा वयः - अजाश्चावयश्चाजावयः , अजाश्छागाः, अवयो मेषाः, त उभयेपीत्यर्थः । जाताः ।

अत्रच पुनः पुनः ' तस्मा' दित्यस्य जनि धातो श्चोपादानं तत्तद्वस्तू त्पत्ति स्थानावान्तरभेद प्रदर्शनार्थम् । तत्र ऋग्वेदस्य गायत्र्याश्च ब्रह्मणः पूर्वमुखात् , सामवेदस्य पश्चिममुखात , यजुषो दक्षिण मुखात , अथर्बललभ्यस्या थर्व वेदस्यो त्तरमुखाच्चोत्पत्तिः , अश्व रासभादीनांपादाभ्यां, गवा मुदरात् ; अजानां मुखात , अवीनां वक्षसश्चोत्पत्ति र्बोध्या ।

यथोक्तं श्रीमति वैष्णवे पुराणे - प्रथमांशे पञ्चमाध्याये-

" गायत्रं च ऋचश्चैव त्रिवृत्स्तोमं रथन्तरम् ।
अग्निष्टोमंच यज्ञानां निर्ममे प्रथमा न्मुखात् ॥ ५३ ॥
यजूषि त्रैष्टुभं छन्दः स्तोमं पञ्चदशं तथा ।
बृह त्साम तथोक्थ्यंच दक्षिणा दसृजन्मुखात् ॥ ५४ ॥
सामानि जगतीछन्दः स्तोमं सप्तदशं तथा ।
वैरूप मतिरात्रंच पश्चिमा दसृजन्मुखात् ॥ ५५ ॥
एकविंश मथर्वाण मप्तोर्यामाण मेवच ।
अनुष्टुभंच वैराज मुत्तरा दसृजन्मुखात् ॥ ५६ ॥ इति ।

" अवयो वक्षसश्चक्रे मुखतोऽजा न्ससृष्टवान् ।
सृष्ट्वा नुदरा द्गाश्च पार्श्वाभ्यांच प्रजापतिः ॥ ४८ ॥
पद्भ्यांचाश्वान् समातंगान् रासभान् गवयान्मृगान् ।
उष्ट्रा नश्वतरां श्चैव न्यंकूनन्यांश्च जातयः ॥ ४९ ॥ इतिच॥

द्वादशीऋक् ।

यत्पुरुषं व्यदधुः । कतिधाव्यकल्पयन् ।
मुखं किमस्य कौबाहू । कावूरू पादावुच्येते ॥ १२॥

एवं यज्ञानुष्ठानसाधनीभूत पदार्थसृष्टि मुक्त्वा यज्ञानुष्ठायिनां ब्राह्मणादीनां सृष्टिं वक्ष्यन् ब्रह्मण एकैका वयवा देकैकवर्णोत्पत्ति-

रित्य मु मंशं प्रश्नोत्तर रूपेण स्फुटीकुर्व न्नर्थां त्तद्वर्णानां गुणभेद वृत्तिभेदादिकमपि सूचयति (यत्पुरुषमित्यादिना ।) यत् - यदा । पुरुषं - ब्रह्माख्यं । व्यदधुः - पशुमित्यद्ध्याहार्यं , पशुत्वेनाकल्पयन्नित्यर्थः । तत - तदा । कतिथा - कतिप्रकारविशिष्टं । व्यकल्पयन् । अथवा । यत् - यदा । पुरुषम् - मनुष्यम् । व्यदधुः - अकल्पयत , असृजतेत्यर्थः । बहुवचनंछांदसं । तत - तदा । कतिथा - कतिप्रकारविशिष्टं । व्यकल्पयन् - विविधमकल्पयन् । कस्मात्कस्मात्स्थानात् कीदृशकीदृशप्रकारविशिष्ट मकल्पयन्नित्यर्थः । यद्वा - पुरुषं - मनुष्यं । यत् - यदा । व्यदधुः । तदा । कतिथा व्यकल्पयन् - सृज्यमनुष्या द्युपादानभूतं चतुर्मुख शरीरं कति विभाग विशिष्ट मकल्पयन् । एकस्यैव चतुर्मुख शरीरभागस्य वर्णचतुष्टयो पादानत्वे गुणभेदानुपपत्त्या चतुर्मुख स्स्वशरीरं कतिथा विभक्तवानिति पर्यवसितार्थः । एकैकावयवस्य एकैक वर्णोत्पत्ति स्थानत्वे कस्मा त्स्थाना त्कस्यवर्णस्योत्पत्तिरित्याह (मुखमिति) अस्य - चतुर्मुखस्य । मुखम् ! किंरूपमासीदित्यर्थः । अत्रच सामानाधिकरण्यस्य कार्यकारणभाव निबन्धनत्वा न्मुखा दुत्पन्नम् किमिति फलितार्थः । बाहू - पाणी । कौ । अर्थः पूर्ववत । द्विवचनं छांदसं । पादौ - चरणौ । कावित्यनुषज्यते । अत्र चोत्तरानुसारेण मनः किं चक्षुः कि मित्यादयः प्रश्ना अप्यभिप्रेता इत्यनुसन्धेयम् ।

त्रयोदशीऋक् ।

ब्राह्मणोऽस्य मुखमासीत् । बाहूराजन्यः कृतः ।
ऊरूतदस्य यद्वैश्यः । पद्भ्यागूँ शूद्रोअजायत॥ ६३ ॥

अथ एषां प्रश्नानामुत्तराण्याह (ब्राह्मणो स्येत्यादिना) ब्राह्मणः । अस्य - चतुर्मुखस्य । मुखं - आननं । आसीत् । मुखा दुत्पन्नो ब्राह्मणइत्यर्थः । ब्राह्मणस्य वक्ष्यमाण सर्वावयवे भ्युत्तमा न्मुखा दुत्पन्नत्वो-

त्तया तस्या न्यवर्णापेक्षया स्वतएवो त्तमत्वं सूचितम् । मुख व्यापार भूत वेदाध्ययनादि प्रधानत्वं मुख वीर्यत्वंच व्यंजितम् । बाहुः- पाणिः । राजन्यः - क्षत्रियः । कृतः । क्षत्रियो बाहो रजायतेत्यर्थः । बाहुजत्वा द्ब्राह्मणा पेक्षया न्यूनत्वं बाहु व्यापारभूत युद्धादिप्रधानत्वं बाहुवीर्यत्वंच प्रतीयते । वैश्य इतियत् तदस्य ऊरू, - अस्योरुभ्यां वैश्यो ऽ जायते त्यर्थः । ऊरुजत्वाद्वैश्यस्य क्षत्रियापेक्षया न्यूनत्वमवगतम् । पद्भ्यां - पादाभ्यां । शूद्रः - वर्णः । अजायत ! शूद्रस्य पज्जत्वात् सर्ववर्णापेक्षयापि निकृष्टत्वं लब्धम् , पादकार्यभूत गमना गमनादिव्यापारश्च सूचितोभवति ॥

चतुर्दशीऋक् ।

चन्द्रमामनसो जातः । चक्षोस्सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत ॥ १४ ॥

एवं यज्ञकर्तॄणामुत्पत्तिमुक्त्वा यष्टव्य देवतोत्पत्तिमाह (चन्द्रमा मनसो जातइत्यादि) अस्य - चतुर्मुखरूपधरस्य भगवतः । मनसः । चन्द्रमाः - शीतांशुः । जातः - उत्पन्नः । भगव न्मानसस्य सर्वभूत शुभाशंसित्वेना तिशीतळत्वा त्तदुपपन्नस्य चन्द्रमसोप्यतिशीतळत्वं सुखावहत्वं चोपपन्नं । (चक्षोस्सूर्यो अजायतेति) चक्षोः - चक्षुषः । सूर्यः - सर्वार्थ प्रकाशकरोभानुः । अजायत । " जायमानं हि पुरुषं यं पश्ये न्मधुसूदनः । सात्विक स्सतुविज्ञेय स्स वै मोक्षार्थ चिन्तकः " इत्युक्तरीत्या भगवत्कटाक्षस्य सत्वविवर्धन द्वारा सर्वार्थप्रकाशकत्वा त्तदुत्पन्नस्य सूर्यस्य सर्वार्थप्रकाशकत्व मुपपन्नं भवति । (मुखादिन्द्रश्चाग्निश्चेति ।) इन्द्रश्च - परमैश्वर्यवान् देवतासार्वभौम श्शचीपतिश्च । अग्निश्च-देवानांमुखस्थानीयोऽनलश्च, "अग्निमुखावै देवाः " इतिहिश्रुतिः । अजायता मिति विपरिणतस्या नुषंगः । (प्राणाद्वायुरजायतेति) प्राणात - सर्वप्राणन हेतो श्चतुर्मुखरूपधरस्य भगवतः प्राणात् । वायुः - सर्व प्राणन हेतुभूतः । अजायत ॥

पंचदशीऋक् ।

नाभ्यांआसीदन्तरिक्षं । शीर्ष्णोद्यौ स्समवर्तत ।
पद्भ्यां भूमिर्दिशश्श्रोत्रांत् । तथांलोकागूँअंकल्पयन्

एतावतो पास्य देवता मुक्त्वा अथोपासीनानां भोगस्थानभूतस्य अन्तारिक्षादि लोकस्य सृष्टिमाह (नाभ्या आसीदित्यादिना) नाभ्याः-देहमध्य प्रदेशभूता न्नाभिप्रदेशात । अन्तरिक्षं - सूर्याण्डगोळयोर्मध्यदेश रूपोन्तरिक्षलोकः । आसीत । तथोक्तं -"सूर्याण्डगोळयोर्मध्ये कोट्यस्स्युः पंचविम्शतिः" इति । शीर्ष्णः -सर्वावयवेषूर्ध्वस्वानभूता च्छिरसः । द्यौः - द्युलोकः । समवर्तत । इद मुपरितनानांसर्वेषां लोकानांउपलक्षणम् । पद्भ्यां-चरणाभ्यां । भूमिः-पृथिवीमण्डलम् । इदंच सर्वेषा मधोलोकाना मुपलक्षणम् । श्रोत्रात-कर्णात । दिशः - आशाः । इदंच सप्तद्वीपोपलक्षणम् । (तथा लोकाँ अकल्पयन्निति) तथा - यथा पूर्वस्मिन् कल्पे आसं स्तथा । लोकान् - अन्तरिक्षादीन् पृथिव्यादींश्च चतुर्दशलोकान् । अकल्पयन् - अकल्पयत - चकार । बहुवचनं कतिथा व्यकल्पयन्निति प्रश्नानुरूप मत्र विवक्षितम् ।

"सूर्याचन्द्रमसौ धाता यथापूर्व मकल्पयत् ।
दिवंच पृथिवींचा न्तरिक्ष मथो सुवः ।"
"यथ र्तुष्वृतुलिंगानि नानारूपाणि पर्यये ।
दृश्यन्ते तानि तान्येव तथाभावायुगक्षये ॥"
"तथाभिमानिनो नीता स्तुल्या स्ते सांप्रतै रिह ।
देवादेवै रतीतैर्हि रूपै र्नामभि रेवच ॥"
"यस्मि न्यो यः पुरा क्लृप्तो यस्मिन् देशे यथास्थितिः ।
तस्य तस्या नुरूप्येण प्रजा सर्गः प्रवर्तते ॥"
"ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः ।
शर्वर्यन्ते प्रसूतानां तान्ये वै भ्यो ददा त्यजः ॥"

इत्यादि श्रुतिस्मृत्या द्युक्तप्रकारेण पूर्वकल्पीय संस्थानादि सजातीय संस्थानादिविशिष्टं चतुर्दशभुवन सप्तद्वीपादिकं चतुर्मुखोऽसृजदित्यर्थः ॥

षोडशी ऋक् ।

वेदाहमेतंपुरुंषंमहांतं । आदित्यवंर्णंतमंसस्तुपारे ।
सर्वांणि रूपाणि विचित्यधीरः । नामांनिकृत्वाभि-
वदन् यदास्ते ॥ १६ ॥

अथै तादृश गुणजातविशिष्टं भगवन्तम् परमपुरुषम् प्रपन्नानां परम पुरुषप्राप्तिं भक्तिप्रपत्तिव्यतिरिक्तानां भगवत्प्राप्त्य वनुपायत्वं चाभिधाय निगमयिष्य न्नुक्तार्थस्य विश्वसनीयत्व द्योतनाय -

"अहं वेद्मि महात्मानं रामं सत्यपराक्रमं ।
वसिष्ठोऽपि महातेजा येचेमे तपसिस्थिताः"

इत्यादिवत् स्वीयसाक्षात्कार विषयत्वं वेदपुरुष आह (वेदाहमेतं पुरुषं महान्त मित्यादि) अहं - भगव त्संकल्पाहित सार्वज्ञ्यः करोऽहम् । एतं - सर्वज्ञं, सर्वशक्तम् , सर्व जग दन्तरात्मनम् , मोक्षप्रदम् , उभय विभूति विशिष्टम् , निर्हेतुक कृपया जग त्यवतीर्णं, सद्धारका द्वारक जगत्सृष्टि कर्तारं । महान्तं - अपरिच्छेद्य स्वरूप गुण विभूतिकम् , सर्वस्मात्परम् । पुरुषं - नारायणम् । वेद - जानामि । परमपुरुषस्वरूपमेव विशिनष्टि (आदित्यवर्ण मित्यादि) आदित्यवर्णं - आदित्यस्य वर्णइव - वर्णो यस्य तत् , सूर्यसमानवर्ण विग्रह विशिष्टं मध्यस्थ नीलतोयद विद्युल्लेखाभ दिव्यविग्रह मिति यावत् । "य एषोन्तरादित्ये हिरण्मयः पुरुषः" "सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि"

" नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा " " मनोमयः प्राणशरी-
रो भारूपः " " दिविसूर्य सहस्रस्य भवे द्युगपदुत्थिता । यदि भा-
सदृशीसास्या द्भास स्तस्य महात्मनः " इत्यादिभि र्भगवतो दि-
व्यविग्रहस्य विद्युद्वर्णत्वादि प्रतीतेः । तमसः - मूलप्रकृतेः । पारे-
ऊर्ध्वदेशे । त्रिपा द्विभूता वित्यर्थः । " तम आसीत, तमसा गूढ -
मग्रे प्रकेतं " " अक्षरं तमसि लीयते, तमः परे देव एकी -
भवति " इत्यादौ तम श्शब्दस्य मूलप्रकृतौ प्रसिद्धेः, केवलस्य
तमसोऽवस्थाना सम्भवाच्च त्रिगुणात्मिका मूलप्रकृतिरेवात्र तमश्शब्द
वाच्या । अण्डा दुपरि स्थिताया स्तमश्शब्दवाच्यायाः प्रकृते रन-
न्तरं विराजानद्याः पारे हि वैकुण्ठलोकः ।

तथाचोक्तं पाद्मोत्तर खण्डे १२७ सप्तविंशोत्तर शत तमे ऽध्याये-

" असंख्य प्रकृतेः स्थानं निबिडध्वान्तमव्ययं ।
ऊर्ध्वन्तु सीम्नि विरजा निस्सीमाध स्सनातनी " इति ।
" प्रधान परमव्योम्नो रन्तरे विरजानदी ।
वेदांगस्वेदजनिततोयैः प्रस्राविताशुभा ॥
तस्याः पारे परे व्योम्नि त्रिपाद्भूति स्सनातनी " इतिच ॥

अस्यच यदास्त इत्यग्रेतनेनान्वयः । तथाच-आदित्यवर्णं ,
धीरः, यत , सर्वाणि रूपाणि विचित्य नामानि कृत्वा, अभिवदन्,
तमसः पारे आस्ते , एतं महान्तं पुरुष महं वेदे त्यन्वयो बोध्यः ।
नपुंसकत्वंच्च छान्दसं वेदितव्यम् ।

धीरः - धिया रमत इति धीरः , धिया रममाणः , संकल्प
रूपज्ञानमात्रेण जगत्सृष्ट्यादिकर्तेति यावत् । यद्वा - धीरः - धीम
ता मग्रेसरः , स्वानभिज्ञानामपि संसारिणां करणकळेबरप्रदान त-
न्मूलसुकृताऽ द्वेषाभिमुख्यादि क्रमेण स्वानुभवयोग्यतापादन पर्यन्त
क्रमाभिज्ञ इति यावत । यत् - यः परमपुरुषः । सर्वाणि रूपा-
णि - तत्तत्कर्मानुगुण देवमनुष्यादि विचित्र संस्थानानि शरीराणि ।
विचित्य - कृत्वा । नामानि - तत्तत्संस्थान विशिष्टवस्तुवाचिनः

शब्दान् स्वपर्यन्तांश्च । कृत्वा - विधाय । अभिवदन् - तत्तत्संस्था-
नशरीरविशिष्टानां तत्तच्छब्दवाच्यानां भूतानां स्वप्राप्ति पर्यन्ता मा-
शिषं वदन् । आस्ते - तमसः पारवर्तिनि पूर्वोक्ते " देवानां पू
रयोध्या " " तस्यां हिरण्मयः कोशः स्वर्गो लोको ज्योतिषा वृ-
तः " इत्यादि श्रुति स्मृत्यादिप्रसिद्धे नित्यनिर्मलज्ञानानन्दमये परे
व्योम्नि अयोध्यापराजिताख्य दिव्यनगरे ऽतिरमणीये दिव्यायतने आ
नन्दमये सहस्रस्थूणे दिव्यमण्टपे नित्यनिरवद्य निरतिशय सौगन्ध्य
सौकुमार्यादिविशिष्टानन्तभोगपर्यंके श्रीभूनीळाभिः परिचरितचरणयु-
गळो विराजते । यआस्ते तमहं वेदेति पूर्वेणान्वयः । तमेवं
विद्वानित्युत्तरेण वा ॥

सप्तदशी ऋक् ।

धातापुरस्ताद्यमुदाजहार । शक्रःप्रविद्वान्प्रदिशश्चत
स्रः । तमेवंविद्वानमृतइहभवति । नान्यःपन्था-
अयनायविद्यते ॥ १७ ॥

धाता - चतुर्मुखः । पुरस्तात् - सृष्टिकाले । यम् - पर-
मपुरुषम् । उदाजहार - अस्तौषीत । एतच्च स्वस्तोत्रप्रसन्ना द्भ-
गवत श्चतुर्मुखस्य जगत्सृष्ट्यनुकूलज्ञानलाभस्यो पलक्षणम् । एते
न पूर्वोक्त चतुर्मुख स्रष्टृत्वादिगुणयोग उक्तो भवति । यद्वा -
धाता । पुरस्तात - पूर्वकाले । यम् । उदाजहार - " तद्धैत
द्ब्रह्मा प्रजापतय उवाच प्रजापति र्मनवे मनुः प्रजाभ्यः " इत्युक्त
रीत्यो पादिशत् इत्यर्थः । प्रविद्वान् - भगवतो वामदेवा द-
वाप्ततत्वज्ञानः प्रतर्दनाय ब्रह्मविद्योपदेष्टाच । शक्रः - शचीप-
तिः । य मुदाजहरे त्यनुषज्यते । प्रदिश श्चतस्रः - प्रधानभूता
श्चतस्रः दिशः - तादृश दिगुपलक्षिताः एकत द्वित त्रित सनक
सनन्दन वाल्मीकि पराशर पाराशर्य शुक शौनक प्रभृतयः म-

हान्तः । य मुदाहरन्तीति विपरिणतस्या नुषंगः । तमहं वेदे-
त्यन्वयः । अनेन वाक्यद्वयेन ‘ यदास्त ’ इत्युक्त प्रसिद्धि
रुक्ता भवति ।

(तमेवं विद्वानित्यादि) तम् – उक्तप्रकार परत्वसौलभ्या-
दिसर्वगुणविशिष्टं परमपुरुषम् । एवं विद्वान् - जगत्कारणत्वा-
दिगुणा दित्यवर्णादिव्यविग्रहादिविशिष्ट मुपासीनः । इह – अस्मि-
न्नेव लोके । अमृतोभवति - मुक्तोभवति , कृतकृत्यत्वा न्मुक्त-
तुल्योभवतीत्यर्थः ! यद्वा –मुक्तव द्ब्रह्मसाक्षात्कारेण ब्रह्मानुभवशालित्वा
न्मुक्तइ त्युपचर्यते । ब्रह्मविद्यानिष्ठस्य निष्पन्न दर्शनसमानाकारता
पन्नात्यर्थप्रियब्रह्मोपासनस्य “ तस्य तावदेव चिरं याव न्नविमो-
क्ष्य ” इति शरीरपातमात्रविळम्बित ब्रह्मप्राप्तेः “ कृतकृत्याः प्र-
तीक्षन्ते मृत्युं प्रियमिवातिथिं ” इत्युक्त प्रकारेण कृतकृत्यस्य मु-
क्ततुल्यताहि सर्वप्रकारेणा प्यस्त्येव ।

अथवा – तम् - पूर्वोक्तं आश्रयण सौकर्यापादका श्रितका-
र्यापादक सर्वगुणविशिष्टं परमपुरुषम् । एवं - ‘ अबध्नन् पुरुषं
पशु ’ मित्याद्युक्तप्रकारेण । विद्वान् – प्रपन्नः पुरुषः । भगवत्येव
सर्वप्रकारेण विन्यस्तात्मभरइतियावत् । इह – अस्मिन्नेव लोके ।
अमृतोभवति – मुक्तोभवति । “ विदुः कृष्णं ब्राह्मणा स्तत्वतो
ये तेषां राजन् सर्वयज्ञा स्समाप्ताः ” “ सकृदेव प्रपन्नस्य
कृत्यं नैवात्र विद्यते ” इत्याद्युक्तप्रकारेण कृतकृत्यस्य भोगरूपभग-
वत्कैंकर्यनिरतस्य मुक्ततुल्यत्वा न्मुक्त इत्युपचारः ॥

तमेवं विद्वा नित्यत्र वेदनवाचिशब्दः उपासन प्रपदनोभयपरः ।
अभिमतं चेदं पूर्वेषामपि । अतएव श्रीमत्तात्पर्यदीपिकायां – “ त
स्य तस्यात्मनः कर्मकृतविचित्रगुणमय प्रकृतिसंसर्गरूपा त्संसारा
न्मोक्षो भगवत्प्रपत्ति मन्तरेण नोपपद्यत इत्युक्तं भवति , ‘ ना-
न्यः पन्था अयनायविद्यते ’ इत्यादिभि श्श्रुतिभिश्च ” इति वेदार्थ
संग्रह वाक्य व्याख्यानावसरे · “ कथं ‘ तमेवं विद्वान् ’ इत्यादि

वाक्यानां प्रपत्तिमन्तरेण मोक्षानुपपत्ति परत्वम् ” इत्याशंक्य “ उ-
च्यते ; ‘ तमेवं विद्वान् ’ इत्यादिवाक्याना मुपासन विधिपरत्वा
त , उपासनस्यच स्वनिष्पत्यर्थं प्रपत्तिसापेक्षत्वाच्च उक्तार्थः फलि-
तः ” इति प्रथमतो वेदनवाचिनो विद्वानिति शब्दस्योपासनमात्र
परत्व तात्पर्येण समाधानमुक्त्वा , तदनन्तरं “ यद्वा ‘विद्वा’ निति -
वेदनवाचिशब्द उपासनप्रपदन साधारणइति भावः ” इति वेदन
वाचिशब्दस्य उपासन प्रपदनोभयसाधारणत्वं कण्ठत एवोक्तं दृ-
श्यते। एव मन्यत्रापि द्रष्टव्यम् ।

अथ भगवद्वेदनातिरिक्तस्य तत्प्राप्तिसाधनत्वं न विद्यत इत्या
ह (नान्यःपन्था इत्यादि) अयनाय – परमप्राप्यभूत भगवत्प्राप्तये ।
अन्यः पन्थाः - मार्गान्तरं , उपायान्तरमित्यर्थः । न विद्यते – ना-
स्ति । ईयत इत्ययनमिति व्युत्पत्त्या ऽ यनशब्दः प्राप्यपरः, प्रकृति
संसर्ग निवृत्तिपूर्वक वैकुण्ठाख्यदेश विशेषावच्छिन्न भगवत्प्राप्ति
र्भगवत्प्रपदन मन्तरा न सम्भवतीत्यर्थः । अयमर्थः – पू-
र्वोदाहृत वेदार्थसंग्रहग्रन्थेन सुव्यक्तः । भक्त्यादिसाधनान्तर नि-
ष्ठानामपि तन्निष्पत्तये भगवत्प्रपत्ते रावश्यकत्वा त्प्रपत्तिं विना भग-
वत्प्राप्ति र्नोपपद्यत इत्यय मर्थ उपपन्नतरः । अतएव भरद्वाजसंहि-
तायां – “ अनेनैवहि कर्माद्या योगा स्सिद्ध्यन्ति योगिनां । सिद्धि-
र्न तद्व्यपेक्षास्य तस्मादेनं परं विदुः ” इति कर्मादीनां प्रपदना
पेक्षत्वमुक्तं । श्रीभाष्येच उपासकानामपि भगवद्वशीकरणेनैव फलसि-
द्धिमुक्त्वा “ तस्यच वशीकरणं तच्छरणागति रेव ” इति तद्वशी-
करणाय शरणागते, रावश्यकता दर्शिता । ‘ प्रपन्नादन्येषां नदिशति
मुकुन्दो निजपद ’ मितिचा भियुक्ताः ।

अत्र चोपायान्तराभाव प्रदर्शनमुखेन भगवत्प्रपत्ते रावश्यकत्व
मात्रमेव दर्शितं । तावतापि नप्रपत्ते रुपायत्व प्रसक्तिः । प्रपत्ते रधि
कारिविशेषणत्वेना वश्यकतामात्र प्रदर्शनपरत्वा त्तस्य वाक्यस्य ।

यद्वा - ' नान्यःपन्था ' इत्यत्रा न्यशब्देन ' तमेवं विद्वा'निति तच्छब्द प्रस्तुत परमपुरुष प्रतियोगिक भेदएव विवक्षितः । पानकं पिबन् सुखीभवतीत्यत्र पानकस्य सुखसाधनताया इव 'तमेवंविद्वा ' नित्यत्रापि तच्छब्द प्रस्तुत परमपुरुषस्यैवा मृतत्व प्राप्ति हेतुताया लाभसम्भवात् ।

अष्टादशी ऋक् ।

यज्ञेनंयज्ञमंयजंतदेवाः । तानिधर्माणिप्रथमान्यांसन् । तेहनाकं मंहिमानंस्सचंते । यत्रपूर्वेसाध्यास्संति देवाः ॥ १८ ॥

अथै तदनुष्ठातॄन् तेषां परमपुरुषार्थप्राप्तिंचा भिधाय निगमयति (यज्ञेनेत्यादिना) देवाः मुमुक्षवः ।

" अवजानन्ति मां मूढा मानुषीं तनु माश्रितम् ।
परं भाव मजानन्तो ममभूत महेश्वरं ॥
मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसी मासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥ "

इत्युक्तरीत्या भगवद्विद्वेषिणां तद्विमुखानांचा सुरप्रकृतितायाः,

" महात्मानस्तु मां पार्थ दैवीं प्रकृति माश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादि मव्ययम् ॥ "

इत्युक्तरीत्या भगवदभिमुखानां भक्तानां देवप्रकृतित्वस्य चसम्प्रतिप[न्न]त्वात्,

" द्वौ भूतसर्गौ लोकेस्मिन् दैवआसुरएवच । "
" दैवीसम्पद्विमोक्षाय निबन्धायासुरी मता ॥ "

इत्यादिभिश्च मुमुक्षूणां देवसर्गान्तः पातितालाभात,

' विष्णुभक्तिपरो देवो विपरीत स्तथासुरः । "

इत्यादिभि र्विष्णुभक्तिपराणां तथात्वावगमा च्चात्र देवा मुमुक्षवएव ।

देवासुरशब्दयोः प्रवृत्तिनिमित्तभूतौ धर्मौ च भगवदाज्ञानुवर्तन शीलत्व तदतिवर्तनशीलत्वरूपौ । सूचितंचेदं भगवता भाष्यकृता श्रीमतिगीताभाष्ये षोडशाध्याय तृतीयचतुर्थश्लोक व्याख्यानयोः । तत्रहि " देवाभगवदाज्ञानुवृत्तिशीलाः " " असुरा भगवदाज्ञातिवृत्तिशीलाः " इत्यनुगृह्णता भगवदाज्ञानुवर्तनशीलत्वं देवशब्द प्रवृत्तिनिमित्तमिति भगवदाज्ञातिवर्तनशीलत्व मसुरशब्दप्रवृत्तिनिमित्त मितिच सुस्पष्टमेवो क्तम्भवति । एतादृशं च देवशब्दप्रवृत्तिनिमित्तं मुमुक्षुषु सुपुष्कलमेव ।

यज्ञेन - यजनीय देवतोद्देश्यक द्रव्यत्यागरूपेण कर्मणा । परमपुरुषोद्देश्यक प्रणवकरणका त्मसमर्पणरूप मानसयज्ञेनेति यावत् । मुमुक्षूणा मात्मसमर्पणस्यैवा वश्यकर्तव्य यज्ञरूपत्वात् , उत्तरत्रश्रूयमाण परमपुरुषार्थस्या न्य यज्ञफलत्वा सम्भवाच्च । " अहमेवाहं मांजुहोमिस्वाहा " " इदमहं माममृतयोनौ सूर्येज्योतिषिजुहोमि " " ओमित्यात्मानं युञ्जीत " इत्यादिभि रात्मसमर्पणस्य यागरूपताचावगम्यते ।

यज्ञं - यजनीय देवतारूपं भगवन्तं परमपुरुषम् ।

" यज्ञोवै विष्णुः " इतिश्रुतिः । उपब्रह्मणंचात्र भवति-
" यागसाधनभूतेन स्वात्मना मेध्यमीश्वरम् ।
अयजंस्तानि धर्माणि प्रथमानीतिनश्श्रुतम् ॥ " इति ।

अयजन्त । भगवन्त मुद्दिश्यात्मसमर्पण रूपं यागमकुर्वन्नित्यर्थः ।

अथा यमेवा नादिकाला त्प्रवर्तमान स्समीचीनो धर्मइत्याह-(तानिधर्माणीति) लिंग वचनयो र्व्यत्यय श्छांदसः । तानिधर्माणि

सधर्मएव । प्रथमानि - प्रधानः । आसन् - आसीत् । "त- स्मा न्नचास मेषां तपसा मतिरिक्त माहुः " इतिसर्वोत्तरोह्ययं धर्म श्श्रूयते । आसन्निति च कल्पान्तरयुगान्तराद्यभिप्रायेण । कल्पान्तरे प्यय मेव धर्म स्सर्वप्रधान आसी दितिभावः । यद्वा 'प्र थमान्यास' न्निति कृतयुगादि तात्पर्येण । यथाच श्रीभागवते एका दशस्कन्धे स्मर्यते । -

"आदौकृतयुगेवर्णो नृणां हंस इति स्मृतः ।
कृतकृत्याः प्रजा जात्या तस्मात्कृतयुगंविदुः ॥
वेदः प्रणवएवाग्रे धर्मोहंवृषरूपधृक् ।
उपासन्ते तपोनिष्ठा हंसंमाम्मुक्तकिल्बिषाः ॥" इति ॥

अत्रहि प्रणवकरणकं भगवदुपासनम् 'ओमित्यात्मानं युञ्जीत' इत्युक्त मात्मसमर्पणरूपमेव ।

अथैव मात्मसमर्पणरूपं याग मनुष्ठितवतां फलमाह (तेह ना- कमित्यादि) ते-पूर्वोक्तात्मसमर्पणरूप यज्ञानुष्ठातारः । नाकं - नित्यनिरतिशयानंदैकतानं मोक्षपरमपदा क्षरपरंधामादिशब्दितम् नाकाख्यं वैकुण्ठलोकम् । क मिति सुखमुच्यते, अकमितिदुःखं, तन्नविद्यते यत्र त न्नाकमिति व्युत्पत्त्या दुःखशून्य वाचकस्य नाकश- ब्दस्य योगरूढ्या तादृशपरमव्योमत्वावच्छिन्न वाचकत्वात् । रू- ढिश्च - 'नाकोंऽबरे रवौ स्वर्गे परमव्योम्निचस्मृतः " इति निघण्टु- बला देव गम्यते । महिमानः- परमसाम्यापत्तिरूप महिम वन्तः । " ब्रह्मणो महिमान माप्नोति " इति हि श्रूयते ।

अथवा - महिमानः - भगव न्महिमभूताः , भगवद्विभूत्यन्तर्गत- तया भगव द्विभूतिभूता इत्यर्थः । परब्रह्मोप संपत्त्या निवृत्ताविद्यातिरोधानस्य सुविदितस्वात्मयाथात्म्यस्य परमात्मात्मकस्वात्मानुसं धानेन अहंब्रह्मास्मीत्येव ह्यनुभवो मुक्तस्य । अयमर्थः " अविभागेन दृष्ट त्वा" दित्यत्र भाष्ये प्रतिपादितः ।

यद्वा- महिमानः - पूजयन्तः, भगवन्तं नारायणमर्चयन्तः । "महपूजाया" मित्यस्मा न्निष्पन्नोयम् । अथवा-महिमानः - पूज्यमानाः, अर्चिरादिभि रातिवाहिकगणै रभिपूज्यमाना इत्यर्थः । प्राप्येत्यध्याहारः । सचन्ते-समवेता भवन्ति । "षच समवाये" इति धातुः । नित्यसूरिपरिषदा एकगोष्ठीभवन्तीत्यर्थः । हेतिप्रसिद्धौ । साच " ब्रह्मविदाप्नोति- परम् " । परं ज्योति रुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते " इत्या दिश्रुतिस्मृत्यादि सिद्धा । अथ कैरेते समवेता भवन्तीत्यमु मर्थ प्रकाशयन् स्थान विशेषं विशिनष्टि (यत्र पूर्वइत्यादि) यत्र - वैकु ण्ठलोके । पूर्वे - पुरातनाः, " यत्रर्षयः प्रथमजा ये पुराणाः " इति श्रुतिप्रसिद्धाः, सर्वदा भगव न्नित्यसंकल्पेना स्खलितज्ञानाः । साध्याः - प्राप्यभूताः । चेतनस्वरूपस्य तदीयशेषत्व पर्यन्तत्वेन - प्राप्यस्यापि तदीयकैंकर्यपर्यन्तत्वा न्नित्यसूरिपरिषदामपि परम प्राप्यत्वा त्ते साध्या इत्युच्यन्ते । यद्वा - साध्याः - साध्याख्याः । दे- वाः - सर्वदा भगवत्स्तुतिपरायणाः अनन्तगरुडविष्वक्सेन प्रभृतयो नित्याः । " दिवु क्रीडा विजिगीषा व्यवहारद्युतिस्तुति मोदमदस्व- प्नकान्तिगतिषु " इति धातुः । " तद्विप्रासो विपन्यवः " इतिहि- श्रुतिः । सन्ति - समिन्धते । ' यत्र पूर्वे साध्या देवा स्सन्ति तं ना- कं ते महिमानस्सचन्ते ' इत्यन्वयः । सर्वदा भगवत्स्तुतिपरायणै रस्खलितज्ञानै रनन्तगरुडादिभि रेकीभूय भगवदनुभवं कुर्वन्ती त्यर्थः । एतादृशनित्यसूर्यादिविशिष्टा प्राकृत वैकुण्ठाख्य देशविशेष सद्भावश्च " तद्विष्णोः परमं पदँ सदा पश्यन्ति सूरयः" । इति श्रुत्या पि सिद्धः- । तादृशश्रुते स्सदा दर्शनशालि सूरिविशिष्ट परम पदाख्य स्थानविधायकत्वात् । " यदाग्नेयोऽष्टाकपालः " इत्यादौ कर्मणो गुणानांचा प्राप्तत्वेन सर्वगुणविशिष्ट कर्मविधिपरतावा द- वात्रापि स्थानविशेषस्य सूरीणां सदादर्शनस्यचा प्राप्तत्वेन सदा दर्शनव त्सूरिविशिष्ट स्थानविधिपरता सम्भवस्य वेदार्थसंग्रहे - भगवता भाष्यकृता सुस्पष्टं निरूपितत्वात् । " तद्विप्रा- सो विपन्यवो जागृवांस स्समिन्धते । विष्णोर्यत्परमं पदम् । "

इति श्रुत्याप्यस्यार्थस्य दृढीकृतत्वाच्च । विप्रासः - मेधाविनः । " विष्णुं क्रान्तं वासुदेवं विजान न्विप्रो विप्रत्वं गच्छते तत्वदर्शी" इति स्मृतेः । जागृवाँसः - अस्खलितज्ञानाः । विष्णो र्यत्परमं पदं तत् विपन्यवः - स्तुवन्तः । "पनपण स्तुतिव्यवहारयोः"- इति धातुः । समिन्धते - प्रकाशन्ते । इतिहि तदर्थः ।

अन्य दत्र वक्तव्य मस्मदीयं मोक्ष निर्णय विस्तरेण प्रपञ्चितं तत्रैवानुसन्धेयम् ।

तदेवं " सहस्रशीर्षापुरुषः " इत्यारभ्य " यत्र पूर्वे - साध्यास्सन्ति देवाः ' इत्यन्तेन अपरिच्छिन्नज्ञानशक्त्यादिमन्तं सर्वेश्वरं वाङ्मनसा परिच्छेद्य स्वरूपं परमदयालुं सर्वजगत्सृष्टि स्थितिहेतुभूतं परमपुरुषं नारायणं प्रपन्ना स्सूरिसेव्यं परमव्योमशब्दाभिधेयं परमपदं प्राप्य नित्यसूरिभि रेकीभूय परं ब्रह्मा नुभवन्तीत्युक्तं भवति ।

इदमत्रावधेयम् । ऋग्यजुस्सामाथर्वण भेदेन चतुर्धा भिन्ना वेदाः प्रत्येक मनन्तशाखा स्तत्तदधिकार्युपयोगि नानाविधार्थ प्रतिपादकाः । तत्रैकस्यां शाखाया मधीयमानस्य वाक्यस्य तदन्य सर्वशाखागत सर्ववाक्यै ककण्ठ्येनैवार्थनिर्णयःकार्यः । अयमर्थश्च सूचितो भगवता जैमिना " एकंवा संयोगरूपचोदनाख्याविशेषात " इति, भगवता च बादरायणेन - " सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात । " इतिच । तत्राप्य न्यपरवाक्यैकण्ठ्यापेक्षया ऽनन्यपरवाक्यैक कण्ठ्येनैवार्थनिर्णयः कार्यः । तदेवं तत्वपरवाक्यानां सर्वेषां तत्वनिर्णयैकपर पुरुषसूक्तैककण्ठ्येनार्थनिर्णये क्रियमाणे श्रियःपतिर्भगवा न्नारायण एव परं तत्वमिति सिद्धं भवति, पुरुषसूक्तस्याऽऽमूलचूडं भगवदेकपरत्वात् ।

पुरुषसूक्तस्य च भगवत्परत्वं-

भगवदसाधारणस्य भगवति रूढस्य पुरुषशब्दस्या त्रोपक्रमएव श्रवणात् (१)

" सहस्रशीर्षा पुरुषः " " पुरुष एवेदँ सर्वम् " " ततो ज्यायाँश्च पुरुषः " " वेदाह मेतं पुरुषं महान्तम् " इति पुरुषशब्दस्य पुनःपुनरभ्यासात (२)

" सहस्रमूर्धा विश्वात्मा सहस्राक्ष स्सहस्रपात । " इति सहस्रनामाध्याये भगवन्नामत्वेन पठितानां - " विश्वतश्चक्षुरुतविश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् । " " सर्वतः पाणिपाद न्तत्सर्वतो क्षिशिरोमुखम् । " इत्यादिसिद्ध सहस्रशीर्षत्वादि प्रतिपादकानां " विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः । " इत्यादिभि र्भगवता बादरायणे नोपबृंहितानां सहस्रशीर्षादिशब्दाना मत्र पाठात् (३)

" अन्तः प्रविष्ट श्शास्ता जनानाँ सर्वात्मा " " एष सर्वभूतान्तरात्मा ऽपहतपाप्मा दिव्यो देव एको नारायणः " " अह मात्मा गुडाकेश सर्वभूताशयस्थितः " इत्यादिश्रुतिस्मृत्यादिप्रतिपन्नस्य भगवदेकान्तस्य सार्वात्म्यस्य " सभूमिं विश्वतो वृत्वा " " पुरुष एवेदँ सर्वम् " इत्यादिभिरत्र प्रतिपादनात, (४)

'मोक्षमिच्छे ज्जनार्दनात' 'मुक्तिप्रदाता सर्वेषां विष्णुरेव नसंशयः।' " मामेव ये प्रपद्यन्ते माया मेता न्तरन्तिते । " इत्यादि परश्शत प्रमाणगण प्रतिपन्नस्य भगवदेकान्तस्य मोक्षप्रदत्वस्यात्र " उतामृतत्व स्येशानः । " इत्यनेन प्रतिपादनात् , (५)

" चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेवच । हूयते च पुनर्द्वाभ्यां सनो विष्णुः प्रसीदतु ॥ " " अहं हि सर्वयज्ञानां भोक्ताच प्रभुरेवच । " इत्युक्तभगवदसाधारण सर्व यज्ञफलभोक्तृत्वस्यात्र " सर्व हुत " इत्यनेन प्रतिपादनात् , (६)

" एकोहवै नारायण आसी न्नब्रह्मानेशानः ' सोभिध्यायशरीरात्स्वा त्सिसृक्षु र्विविधाः प्रजाः । अपएव ससर्जादौ तासुवीर्य मवासृजत ॥ आपोनाराइति प्रोक्ता आपोवैनरसूनवः । तायदस्यायनं पूर्वं तेन नारायणः स्मृतः । इत्यादिश्रुतिस्मृतिवचननिकरसिद्धस्य भगवदसाधारणस्य सकलजगत्कारणत्वस्यात्र प्रतिपादनात, (७)

भगव दसाधारण महापुरुषशब्द द्योतक महत्पुरुष शब्दो पादानात्, (८)

"य एषोन्तरादित्ये हिरण्मयः पुरुषः" सर्वे निमेषाजज्ञिरे विद्युतः पुरुषादधि" "नीलतोयद मध्यस्था विद्युल्लेखेव भास्वरा" "दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता । यदिभास्सदृशीसास्या द्भासस्तस्य महात्मनः ॥" "विद्यद्रूपान्महात्मनः" "रुक्माभं स्वप्नधीगम्यम्" "प्रापुरादित्यवर्णतं पुरुषं तमसः परम् ।" इत्यादिपरश्शत श्रुतिस्मृतिगण सिद्धभगवदसाधारणादित्यवर्ण दिव्यविग्रहप्रतिपादकस्य "आदित्यवर्ण" इतिपदस्यात्रोपादानात्, (९)

"विश्वं पुराणं तमसः परस्तात्" "क्षयन्त मस्य रजसः पराके" "प्रापुरादित्यवर्णं तं पुरुषं तमसः परम् ।" "तमसः परमोधाता शंख चक्रगदाधरः ।" इत्यादिप्रसिद्धस्य भगवदसाधारणस्य तमसः पारवर्तित्वस्य "तमसः परस्ता" दित्यनेनात्र प्रतिपादनात्, (१०)

"सदेव सौम्ये दमग्र आसीत्" इत्यादिभिः "एकोहवै नारायण आसी न्नब्रह्मानेशानः" इत्याद्येककण्ठैः प्रतिपादितेन भगवदसाधारणेन कारणत्वेन व्याप्तस्य ध्येयत्वस्य - "योब्रह्माणं विदधाति पूर्वं योवै वेदांश्च प्रहिणोति तस्मै । तँहदेव मात्मबुद्धि प्रसादंमुमुक्षुर्वैशरणमहं प्रपद्ये" इत्यादि प्रमाणगण प्रतिपन्न भगवदेकान्त शरण्यत्वस्य चात्र "तमेवं विद्वा" नित्यादिभिः प्रतिपादनात् (११)

"यज्ञोवैविष्णुः" इत्यादिभि भगवदसाधारण्येन प्रतिपादितस्य यज्ञशब्दस्यात्र पाठात् (१२)

छन्दोगानां सामविधान ब्राह्मणे - "वैषावैष्णवीनामसंहिता" इति देवतार्थक तद्धितान्तेन "वैष्णवी" ति शब्देनास्य निर्देशात, (१३)

तत्रैव "एताम्प्रयुञ्जन्विष्णुं प्रीणाति" इति पुरुषसूक्तजपादे विष्णुप्रीतिकरत्व प्रतिपादनात, (१४)

"नारायणाभ्या मुपस्थानम्" "सहस्रशीर्षापुरुष इत्युपहितां पुरुषेण नारायणेन यजमान उपतिष्ठते" इत्यादिषु देवतार्थकतद्धितान्तेन नारायणशब्देना स्यार्षनिर्देशात्, (१५)

छन्दोग सामविधानब्राह्मणे - "एषा वैष्णवीनाम संहितैतां प्रयुञ्जन्विष्णुं प्रीणाति" इति भगवत्प्रीत्यर्थे जपे, अथर्वणगोपथब्राह्मणे "वैष्णव्यां पुरुषसूक्तम्" इति भगवद्दैवत्यशान्तौ, महोपनिषदि - "धृतोर्ध्वपुण्ड्रः परमेशितारं नारायणं पूजयतिस्म भक्त्या । अर्घ्यादिभिः पौरुषसूक्तमन्त्रै स्समाप्नुया द्विष्णुपदं महात्मा ॥" इति भगवत्पूजायाम्, शौनकस्मृतौ - "पुरुषस्य हरे स्सूक्तं स्वर्ग्यं धन्यं यशस्करम् । आरोग्यं ज्ञानदं पथ्यं योगिज्ञान मिदं परम् ॥" इत्यादिना पुरुषसूक्त मुपक्षिप्य "शौनकोहं प्रवक्ष्यामि नित्यं विष्णवर्चनं परम् । प्रवः पान्तमन्धस इत्यर्धर्चस्य विधानतः ॥" इति भगवदाराधनविधानप्रस्तावे - "आद्यया वाहये देव मृचातु पुरुषोत्तमम् ॥" इत्यारभ्य "षोडश्योद्वासनं कुर्यादेव माराधये द्धरिम् ।" इति भगवदाराधने, व्यासस्मृतौ - "नविष्णवाराधना त्पुण्यं विद्यते कर्मवैदिकम् । तस्मा दनादिमध्यान्तं नित्य माराधये द्धरिम् ॥ तद्विष्णोरिति मन्त्रेण सूक्तेन पुरुषेणतु ।" इति भगवदाराधने, विष्णुस्मृतौ-भगवदाराधनप्रकरणे - "एव मभ्यर्च्यतु जपे त्सूक्तं वैपौरुषं न्ततः ।" इति भगवदाराधनाङ्गजपे, बोधायनसूत्रे, विष्णवाराधनविधानप्रकरणे - "अथैन मृग्यजुस्सामभिः स्तुवन्ति - सहस्राणीति ध्रुवसूक्तं जपित्वा पुरुषसूक्तं चान्यांश्च वैष्णवा न्मन्त्रान्" इति भगवदाराधनाङ्गजपे, शाण्डिल्यस्मृतौ - "पौरुषेणैव सूक्तेन ततो विष्णुं समर्चयेत ।" इति भगवदर्चने, भगवच्छास्त्रे पाद्मादिसंहितासु "आद्ययावाहये द्देव मासनंच द्वितीयया ।" इत्यादिभि भगवदाराधनादिषु, पुराणेषु पाद्मे - "पौरुषेणैव सूक्तेन प्रत्यचंकमलासन । नारायणानुवाकेन विष्णुसूक्तेन वार्चयेत ॥" इतिभगवदर्चने,-एवमन्यैश्चातुदाहृतै र्बहुभिर्वचनै भगवदर्चनादिषु चास्य विनियोगात्, (१६)

मुद्गलोपनिषदि – " योयमुक्तस्सपुरुषो नामरूपज्ञानागोचरं संसारिणोतिदुर्ज्ञेयं विषयं विहायक्लेशादिभि स्संक्लिष्टदेवादिजिहीर्षया सहस्रकलावयवकल्याणं दृष्टमात्रेण मोक्षदंवेषमाददे । तेनवेषेण भूम्यादिलोकं व्याप्यानन्तयोजनमत्यतिष्ठत । पुरुषोनारायणो भूतंभव्यं भविष्यच्चासीत् । " इत्यादिना, शाबल्यब्राह्मणे – " तस्मात्पाद नारायणान्मूल प्रकृतिरजायत । साप्रकृतिः पादनारायण शासना न्महदहङ्कारादीन् सूक्ष्मान्पदार्थानजनयत् । " इत्यादिना च पुरुषसूक्तस्य भतवत्परतया व्याख्यानात् (१७)

पुरुषसंहितायां – " सहस्रशीर्षाइत्यत्र सशब्दो नन्तवाचकः । अनन्तयोजनं प्राह दशांगुळ वचस्तथा ॥ तस्य प्रथमयाविष्णो र्देशतो-व्याप्तिरीरिता । द्वितीयया चास्य विष्णोः कालतोव्याप्ति रुच्यते ॥ "-इत्यादिभिः, महाभारते मोक्षधर्मे –" इदं पुरुषसूक्तंहि सर्व वेदेषु पठ्यते । ऋतं सत्यंच विख्यातमृषि सिंहेन चिन्तितम् ॥ " इत्यादिभिः, आश्वमेधिके पर्वणि –" अहं सहस्रशीर्षस्तु सहस्रवदनेक्षणः । सहस्रपादोदरहक्सहस्त्रोरुस्सहस्रपात् । धृत्वोर्वीं सर्वत स्सम्यग त्यतिष्ठद्दशांगुळम् । सर्वभूतात्म भूतस्थ स्सर्वव्यापी ततोस्म्यहम् । " इत्यादिभिः, हरिवंशे – कैलास यात्राप्रकरणे " सहस्रशीर्षा पुरुष-स्सहस्राक्षस्सहस्रपात । सहस्रोदरसाहस्रं स्सहस्रात्मा दिवस्पतिः ॥ भूमिं सर्वामिमां व्याप्य सप्तद्वीपांससागराम् । अणु स्सर्वत्रगो भूत्वा-अत्यतिष्ठद्दशांगुळम् । त्वमेवेदं जगत्सर्वं यद्भूतं यद्भविष्यति । त्वत्तोविराट् प्रादुरासी सम्राट्चैव जनार्दन । तव वक्त्रा ज्जगन्नाथ ब्राह्मणो लोकरक्षकः । प्रादुरासी त्पुराणात्मन् षट्कर्म निरत-स्सदा । राजन्यस्ते तथाबाह्वोरासीत्संरक्षणे रतः । ऊरूवैश्यस्तथा-चापि पादौ शूद्र उदाहृतः ॥ मनस स्तवदेवेश चन्द्रमास्समपद्यत । सुखकृत्सर्वभूतानां शीतां शुरमितप्रभः ॥ अक्ष्णोस्सूर्य स्समुत्पन्नस्सर्व प्राणिविलोचनः । यस्य भासा जगत्सर्वं भासते भानुमानसौ ॥ मुखा-दिन्द्रश्च अग्निश्च प्राणाद्वायुरजायत । नाभेरभूदन्तरिक्षं तवदेव

जनार्दन । द्यौरासीत्तु महाघोरा शिरस स्तवगोपते । पद्भ्यां भूमि स्समुत्पन्ना दिशश्श्रोत्रा ज्जगत्पते ॥ " इत्यादिभिः, श्रीमति पुराणरत्ने – "सहस्रशीर्षा पुरुष स्सहस्राक्ष स्सहस्रपात । सर्वव्यापी भुवस्स्पर्शा दत्यतिष्ठद्दशांगुळम् । यद्भूतं यच्चवैभव्यं पुरुषोत्तम तद्भवान् । " इत्यादिभिः " दिशः श्रोत्रात्क्षितिः पद्भ्यां त्वत्त स्सर्वम भूदिदम् । " इत्यन्तैश्चास्य सूक्तस्य भगवत्परतयोप बृंहितत्वात, (१८)

" विश्वकर्मामनुस्त्वष्टा " इति सहस्रनामाध्याये भगवन्नामत्वेन पठितयो र्विश्वकर्म त्वष्टृशब्दयो रुपक्रमे पाठेन, " तत्पुरुषस्य विश्व मा-जानमग्रे " " वेदाह मेतं पुरुषं महान्तम् " इतिभगवदसाधारण पुरुषशब्दाभ्यासेन, महापुरुषशब्दद्योतक महत्पुरुषशब्दयो रुपादानेन, भगवद्वाचक महच्छब्दानुबन्धेन, " प्रापुरादित्यवर्णतं " इत्यादिप्र-सिद्धभगवदसाधारणादित्यवर्ण दिव्यविग्रहप्रतिपादकादित्यवर्णपदो-पबन्धेन, - " तमसः परमोधाता " इत्यादि प्रसिद्ध तमःपारवर्तित्व-प्रतिपादनेन, अनन्यसाधारण मोक्षोपायत्व ध्येयत्वयोः प्रतिपादनेन, " राजाधिराज स्सर्वेषां विष्णुर्ब्रह्ममयो महान् । ईश्वरं तं विजा-नीमस्सपिता सप्रजापतिः ॥ " इत्याश्वमेधिके " पुत्रौ प्रजापतिं देवं भक्त्याराधयतं परम् । नारायणं सर्वोदाता वृत्तेर्नूनं भविष्यति ॥" इतिवाराहे- एवमन्यत्रच भगवति दृष्टप्रयोगस्य अन्तस्संचारलिंग दृढीकृत भगवत्परत्वस्य प्रजापतिशब्दस्य पाठन, " अजोपि सन्न-व्ययात्माभूताना मीश्वरोपि सन् । प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्म मायया ॥ जन्मकर्म च मेदिव्य मेवं योवेत्तितत्वतः । त्यक्त्वादेहं पुन-र्जन्म नैतिमामेति सोर्जुन"॥ इतिवचनोप बृंहणस्फुटीकृत भगवत्परत्वस्य "अजायमानः"इत्यादेर्मध्येपाठेन, आश्रितदेवसंघ संरक्षणनिमित्तकतद्विरो-धिनिरसनालिंगेन, " परित्राणायसाधूनां विनाशायचदुष्कृतां । धर्म-संस्थापनार्थाय सम्भवामियुगेयुगे ॥ " इत्याद्युक्तसाधुसंरक्षण प्रयोजनकावतारवत्त्वस्य "पूर्वोयेदेवेभ्योजातः " इतिप्रतिपादनेन, " रामस्यदाक्षिणे-

पार्श्वे पद्मा श्री स्समवस्थिता । सव्येतु ह्रीर्विशालाक्षी व्यवसाय स्तथाग्रतः ॥ " इति श्रीरामायणे परिशेषा त्सव्यपार्श्वान्वयलिंगेन च भूमिपरत्वेन दृष्टप्रयोगस्य –पाद्मे " तथैव धरणी देवी दक्षिणेतरगा तथा ॥ " इति ह्रीशब्दस्थाने धरणीशब्दप्रयोगेन दृढीकृतभूमिपरत्वस्य- समानप्रकरणे वाजसनेयके " श्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति ह्रीशब्दस्थाने श्रीशब्दप्रयोगेन श्रीशब्दस्यच लक्ष्मीशब्देन पौनरुक्त्यप्रसंगा देकपत्न्यन्वयलिंगात – " श्री भूमि श्श्रीधरो हरिः । " इति वचनानुगुण्यत " गन्धद्वारा " मिति मन्त्रे भूम्यां दृष्टप्रयोगत्वाच्च भूमिपरत्वावसायेन तदेककण्ठ्येनापि दृढीकृतभूमिपरत्वस्य– ह्रीशब्दस्य भूदेवीवाचकत्वा द्भगवदसाधारण श्रीभूमिपतित्वस्यात्र प्रतिपादनेन , "ताराॱरूपाणि दृश्यन्ते यान्येतानि नभस्थले । मम रूपाणि तान्येव विद्धि त्वं द्विजसत्तम । " इति महाभारते – " तारामयं भगवत श्शिशुमाराकृति प्रभोः । दिवि रूपं हरे र्यस्तु तस्य पुच्छे धुवः स्थितः ॥ " इति पुराणरत्ने – एवमन्यत्रच प्रसिद्धस्य भगवतो नक्षत्ररूपत्वस्यात्र " नक्षत्राणि रूपम् " इति कथनेन, नारायण समाख्याबलेन, " अद्भ्य सम्भूतो हिरण्यगर्भ इत्यष्टौ"इति वाक्यप्रतिपन्नाम्भस्यनुवाकैकार्थ्येन, एव मन्यैश्च तद्भाष्येस्मन्निरूपितै र्हेतुभि स्सिद्धभगवत्परत्वेन"अद्भ्य स्सम्भूत" इत्युत्तरानुवाकेनैकार्थ्यात् , (१९)

"पुरुषएवेदं सर्वम्" इति वाक्योपादानसूचित नारायणानुवाकसुबालोपनिषदैकार्थ्यात्, (२०)

अन्यै श्चात्रा निरूपितै र्बहुभि र्हेतुभिः सिद्धचति ।

तदेवं सुदृढनारायणपरताक मिदं पुरुषसूक्तं " इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते ॥ " इति व्यासोक्तरीत्या सर्ववेदपठिततया सन्निहितत्वा त्तत्तच्छाखागततत्वनिर्णय परवाक्याना माकांक्षितयोग्यविशेषार्थसमर्पणेनोपकुर्व न्नारायण एव परं तत्वमिति निर्धारयतीति ॥

अथात्रकेषाञ्चि दधिपुरुषसूक्त म्प्रवृत्तोर्वाचीनानां कोलाहलः परिह्रियते ।

तत्र, यत्तावत – " अस्य सूक्तस्य नारायणो नाम ऋषिः " इत्यादि सायनमाधवीयभाष्यादिवाक्योपष्टम्भेन पुरुषसूक्तस्य नारायण समाख्यया व्यवहारस्य ' वामदेव्यंसाम ' इत्यादेरिव नारायण ऋषिकत्वनिबन्धनत्व समर्थनम् ; तत् – " दृष्टंसाम " इत्यस्य साम विषय एव प्रवृत्तेः , " सास्य देवता " इति विहित देवतार्थ काण्णन्ततयाएवा त्राश्रयणीयतया , न संगच्छत इतिपूर्वमेवास्माभि निरूपितम् । यच्चात्र – ' वामदेव्यं-साम' इत्यादाविवेति दृष्टान्तग्रहणम् , तदपि वामदेव्य नारायणशब्दयो र्विभिन्नप्रत्ययान्तत्वेन वैरूप्या न्न संगच्छत इति सुगमं विदुषाम् ।

यच्च – " इह यद्यपी " त्यादिना पुरुषशब्दस्या त्मसामान्ये शक्तस्य शक्त्यन्तरकल्पन मन्तरैव देवताविशेषबोधकत्वोपपत्तौ नारायणे विशेषशक्तिकल्पनस्य बर्हिराज्य नयबाधिततया नारायणपरत्वासम्भव वर्णनम् । तदपि पुरुषशब्दस्या त्मसामान्ये शक्तिं ग्राहयतः प्रचुरप्रयोग तन्मूलक कोशादेरिव नारायणेपि विशिष्यशक्ति ग्राहकस्य प्रयोगकोशादे स्सत्त्वात , बर्हिराज्याधिकरणे बर्हिरादिशब्दानां संस्कारनिमित्तत्वाभावस्या न्योन्याश्रयलौकिकप्रयोगबाध कल्पनाप्रसंगादि, बहुतर दोष प्रसंग भिया व्यवस्थापितत्वेनात्र तन्नयावताराभावाच्चा संगतम् । निरूपितश्चायमर्थोस्माभिः पुरुष शब्दार्थ विचारप्रकरणे पूर्वमेव सुस्पष्टमिति विरमामः ।

यत्तु - " पुरुषोहवै नारायण " इत्यत्र नारायणशब्दस्या साधारण्यं पुरुषशब्दस्य चेतन सामान्यवाचित्वं चानंगीकृत्य पुरुषशब्दस्यापि नारायणपरत्वांगीकारे कलशोघट इत्यादाविवो द्देश्यतावच्छेदक विधेययो र्भेदाभावेन वाक्यस्यैवा ऽबोधकत्व प्रसंग कथनम् ; तदसंगतम् , पुरुषशब्दस्य नारायणपरत्वांगीकारेपि नारायणशब्द

पुषशब्दयोः शक्यतावच्छेदकभेदेनो द्देश्यतावच्छेदक विधेययो र्भेदा द्वाक्यस्य बोधकत्व सम्भवात् । “ सयःपूर्वोस्मात्सर्वस्मा ” दित्यादि बृहदारण्यकादि वचनैः पुरुषशब्दप्रवृत्ति निमित्तस्य सकलजगत्कारणत्वापहतपाप्मत्वादिविशिष्टलक्ष्मीपतित्वरूपस्य , “आपो नारा इति प्रोक्ता ” इत्यादिभि स्सकलजगदाधारत्वादिविशिष्ट लक्ष्मीपतित्वादिरूपस्य नारायणशब्द प्रवृत्तिनिमित्तस्य च विभिन्नाकारस्यैवा वगमेन तयोरेवा त्रोद्देश्यतावच्छेदक विधेयरूपत्वात ।

यदपि - पुरुषशब्दस्यात्मसामान्यशक्त्यपेक्षयातिरिक्तां विशेषशक्तिमंगीकृत्यापि - “ पुरुषोनाम सम्पूर्ण ” इत्यादिवचनबला त्तस्य महादेव बोधकत्ववर्णनम् ; तदपिन , पूर्वोदाहृत श्रौतस्मार्त निर्वचनानां सात्विक बहुस्मृतीतिहासपुराण वचनानां च पुरुषशब्दस्य नारायणे विशिष्य शक्तिं ग्राहयतां जागरूकतया विष्णुव्यवच्छेदेन शिवे शक्ति बोधयतोस्य तामसवचनस्या प्रामाणिकत्वेन शिवबोधकत्वा सम्भवात् ।

“ पूस्संज्ञेतु शरीरेस्मिन् शयनात्पुरुषो हरिः । ” “पूर्णत्वात्पुरुषो विष्णुः ” इत्यादिभिः पुरिशयन पूर्णत्वादिनिमित्तक पुरुषशब्दवाच्यत्वस्य नारायणा साधारण्यप्रतिपादकैः प्रबलतमानेक सात्विक वचनै र्विरोधेना स्यैकस्य वचनस्य भूयसांन्यायेन दुर्बलतया हेयत्वात् । कथंचित्प्रशंसादि परत्वसम्भवेपि रुद्रे पुरुषशब्दवाच्यताविधिकल्पकत्वासम्भवात् । पुरुषशब्दनिर्वचन रूपत्वाभावेन , प्रसिद्धिपर नामपदघटितत्वेन , “ यथा पुरुषशब्दोयं वासुदेवे वतिष्ठते । तथा शंकरशब्दोयम् ” इत्यादि स्कान्दवचनेनैव भवदीयोदाहृतेन प्रशंसादिगन्धरहितेन बलवता विरुद्धत्वेन च, रुद्रे पुरुषपदवाच्यता विधिकल्पकताया स्सुतरामेवा सम्भवाच्च ।

यदपिच - यस्त्वित्यादिना - ‘ पुरुषोनामसम्पूर्ण ’ इत्यादिवचनं साम्बमूर्तिधरत्व प्रतिपादकमिति पक्षस्य खण्डनावसरे “ पांचरात्रा-

दौ नारायणादेरपि अर्थपुंलक्षणरूपस्य प्रसिद्धत्वा त्तत्त्र प्रामाण्यवादिन स्तव तद्व्युदासस्या योगाच्च ” इति दूषणकथनम् , तदपि न, अम्बिकाशब्दपर्यायस्यांबाशब्दस्य गौर्यां प्रचुरप्रयोगेनात्रत्यसांबमूर्तिधरशब्दस्य गौरीविशिष्ट मूर्तिधरत्व प्रतिपादकतया ऽर्थपुं लक्षणरूपस्य नारायणादेर प्यंगीकारेपि तस्य गौरीविशिष्टमूर्तिधरत्वाभावेन तद्व्युदासस्या सांगत्याभावात् ।

एतेन - ‘ तथा मनूक्तौ हिरण्यगर्भस्यापि ’ इत्यादिक मपास्तं, हिरण्यगर्भस्यापि गौरीविशिष्टमूर्तिधरत्वरूप साम्बमूर्तिधरत्वस्याभावेन तद्व्युदासस्या युक्तत्वाभावात ।

यच्च - “ अथ श्रौतव्यवहाराधिक्यात ” इत्यादिना रुद्रेतर देवतानामसामानाधिकरण्येना नाम्नानात् , रुद्रनाम सामानाधिकरण्येना म्नानाच्च पुरुषशब्दस्य महादेवरूढिसमर्थनम् । तन्न;- “पुरुषोहवै नारायणोकामयत ” इति नारायणोपनिषच्छतपथयोः , “ पुरुषं ह नारायण म्प्रजापतिरुवाच ” इति शतपथे, एवमन्यत्रच बहुत्र नारायणनामसामानाधिकरण्येन पुरुषशब्दाम्नान दर्शनात् , पूर्वोदाहृतेषु बहुषु स्मृतीतिहास पुराणवचनेषु नारायणनामसामानाधिकरण्येन प्रयोगदर्शनाच्च , देवतान्तर नामसामानाधिकरण्येना नाम्नानस्यासिद्धत्वात् । रुद्रनामसामानाधिकरण्येना म्नानमात्रस्या किंचित्करत्वाच्च । “ पुरुषोहवै नारायणो कामयत ” इत्यत्र नारायणशब्द समानाधिकरणतया पुरुषपदस्याम्नानेपि तस्य विष्णुपरत्वासाधकत्वं वर्णयतां रुद्रनामसामानाधिकरण्येन पुरुषपदाम्नानस्य रुद्रे पुरुषपदवाच्यतासाधकत्व वर्णनस्य स्ववचन विरुद्धत्वेन हेयत्वात् । “ पुरुषोवै रुद्र ” इत्यत्र पुरुषपद सामानाधिकरण्येन रुद्रपदाम्नानस्य रुद्रे पुरुषात्मकत्वप्रतिपादन प्रयोजनकताया अन्यत्र निरूपिततया तावता पुरुषशब्दस्य रुद्रे शक्तिसिद्ध्य सम्भवाच्च ।

यच्च - "महान्प्रभुर्वै पुरुषस्सत्वस्यैष प्रवर्तकः " इतिवचनस्य रुद्रनाम सामानाधिकरण्येन पुरुषशब्दप्रयोग प्रदर्शनायोपादानम्; तदप्यसंगतम्, " अथ योह खलुवा अस्य राजसोंश स्सोसौ ब्रह्मचारिणोयोयं ब्रह्मा, अथयोह खलुवा अस्य सात्विकोंश स्सोसौ ब्रह्मचारिणो योयं विष्णुः, अथयोह खलुवा अस्य तामसोंश स्सोसौ ब्रह्म चारिणो योयं रुद्रः " इति मैत्रायणीयोपनिषद्वाक्येन, " यत्सत्वंसहरिर्देवो योहरिस्तत्परम्पदम् " इत्यादि वराहपुराणान्तर्गतागस्त्य रुद्रसंवादवचनैः, एवमन्यान्यैश्च वचनै भंगवतो लक्ष्मीपते र्नारायणस्यैव सत्वप्रवर्तकताया स्सत्वमयताया श्चावगमेन तत्रत्य पुरुषशब्दस्य नारायण परत्वा वश्यकत्वेन तत्र रुद्रनाम सामानाधिकरण्येन पुरुषशब्दप्रयोगस्यानुपलम्भात् ।

यदपिच - " ननु - ' पुरुषोहवै नारायणोकामयत ' इत्यत्र पुरुष शब्दस्य भगवति नारायणेपि प्रयोगा दयं कुतो न पुरुषशब्दो नारायणमप्यभिदध्यात् " इति पूर्वपक्षमुपक्षिप्य " काममसौस्यात्, यद्यविशेषणभूतो क्षीणरूढिशक्तिः " इति समाधानकथनम् । तदपि मन्दम् - पुरुषशब्दस्य नारायणशब्द विशेषणीभूतत्वेपि क्षीणरूढिशक्तिकत्वाभावात् । नारायण पुरुषशब्दयो र्योगरूढत्वेन पंकजनिकर्तृत्वविशिष्टपद्मत्वादेः पंकजादिपदस्येव सकलजगदाधारत्वादिविशिष्ट नारायणत्वस्यैव नारायण शब्दशक्यतावच्छेदकतया तादृशधर्मावच्छिन्ने सकलजगत्कारणत्वादिविशिष्ट नारायणत्वरूप पुरुषपदशक्यतावच्छेदकावच्छिन्नस्य विशेषणतायां बाधकाभावात् । दण्डैवा व्रक्तदण्डवानितिवत् रक्तदण्डवान् सुन्दरदण्डवानित्यादेरपि दण्डांशे विशेषणभूतरक्तत्व सौन्दर्ययो विभिन्नतामात्रेणसम्भवस्य सर्वांगीकृततया तद्वदेवात्रापि नारायणविशेषणीभूतधर्माणां परस्परं भिन्नतया पुरुषोनारायण इत्यस्य सुसंगतत्वेन बाधकाभावात् ।

एतेन - " पूर्वमेवाह मिहास 'मिति स्वस्विन् हिरण्यगर्भप्रति" इत्यादिकमपि दत्तोत्तरम् ।

यदपि - " पुरुषोवै रुद्र ' इत्यादौ ' तेनेदं पूर्णं पुरुषेण सर्वं ' मित्युपक्रमानुरोधेन " इत्यादिना ' पुरुषोवै रुद्र ' इत्यादौ 'पुरुषोनाम' सम्पूर्ण ' इति वचनबला त्पूर्णत्वेनोपाधिना रुद्रे पुरुषशब्दवाच्यताविधिकल्पनम्, तदपिन - " तेनेदं पूर्णं पुरुषेणसर्वं " " यत्र कर्म श्रेषोवा यज्ञश्रेषोवा तत्र पुरुषं चिन्तयन् पुरुषसूक्तं ब्रूया त्पूर्णत्वा त्पुरुष इतिविज्ञायते " इति श्रुति वाधूलवचनानुरोधेन पूर्णत्वस्य पुरुषशब्द प्रवृत्तिनिमित्तत्वांगीकारेपि " अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः " " यः पृथिव्यां तिष्ठन् + एषत आत्मान्तर्याम्यमृतः " " योक्षरमन्तरे सञ्चरन् + एष सर्वभूतान्तरात्मापहत पाप्मा दिव्योदेव एकोनारायणः " " यत्किञ्चित्सृज्यते येन सत्त्वजातेन वैद्विज । तस्य सृज्यस्य सम्भूतौ तत्सर्वं वैहरेस्तनुः " "अहमात्मागुडाकेश सर्व भूताशयस्थितः " " सर्वस्य चाहं हृदिसन्निविष्टः " इत्यादिभि स्सकलजगदन्तर्यामित्वरूप सर्वजगद्व्याप्ते र्नारायणासाधारण्यावगमेन पूर्वोदाहृत निर्वचनेषु " पूर्णत्वात्पुरुषोविष्णुः पुराणत्वाच्च शार्ङ्गिणः " इतिवचनेन पूर्णत्वेनोपाधिनापि नारायणस्य पुरुषशब्दवाच्यतायाः प्रतिपादनेन " सर्वलोकपतिस्साक्षात्पुरुषः प्रोच्यते हरिः । तं विना पुण्डरीकाक्षं कोन्यः पुरुशब्दभाक् " इत्यादि पूर्वोदाहृतवचन विरोधेन च " पुरुषोनामे " त्यादेरकिञ्चित्करत्वात् । " यथा पुरुषशब्दोयं वासुदेवे वतिष्ठते " इतिस्कान्दवचन विरुद्धस्य " पुरुषोनामसंपूर्ण " इत्यादेरस्य स्कांदवचनस्य प्रसिद्धिपरनामादि पदघटितस्य दुर्बलस्य रुद्रेपुरुष पदवाच्यता विधिकल्पकत्वाभावाच्च ।

एतेनैवच - " एवंच सती " त्यारभ्य पूर्ववासेनोपाधिना भगवतः पुरुषशब्दवाच्यत्व माक्षिप्य " तथापी " त्यादिना पूर्णत्वेनोपा

धिना पुरुषशब्दवाच्यस्यैव वाधूलसूत्राद्यनुरोधेन पुरुषसूक्तप्रतिपाद्यत्वात्पुरुषसूक्तस्य नारायणपरत्वाभावकथनमपि समाहितं, पूर्वोक्तरीत्या पूर्णत्वरूपोपाधे र्नारायणासाधारणतया पुरुषसूक्तस्य पूर्णत्वेनोपाधिना पुरुषशब्दवाच्य प्रतिपादकत्वावश्यकत्वेपि नारायणपरताया अनपवादात् ।

यच्च – पूर्णत्वेनोपाधिना पुरुषशब्दवाच्यस्यैव पुरुषसूक्तप्रतिपाद्यत्व मित्यत्रोपष्टम्भकतया " पुरुष एवेदं सर्वं " इति वाक्य मुपादाय, तस्यच वाक्यस्य " सर्वो ह्येष रुद्रः " इति वाक्येन विवरणात्तदनुसारेण रुद्रपरत्वव्यवस्थापनं । तदप्यसंगतं, " नारायण एवेदँ सर्वं " इति वाक्यस्य " पुरुष एवेदं सर्वं " इति वाक्यसमानानुपूर्वीकतया तत्प्रत्यभिज्ञापकस्य तद्विवरणरूपताया युक्तत्वेन " सर्वो ह्येष रुद्रः " इति वाक्यस्य तदसमानानुपूर्वीकस्य तद्विवरणरूपत्वासम्भवेन 'पुरुष एवेद' मित्यस्य रुद्रपरत्वाभावेन तदुपष्टम्भेन सूक्तस्य रुद्रपरत्वासम्भवात । प्रसिद्धिद्योतक हिशब्दघटितस्यास्य वाक्यस्यानुवादस्वरूपतया अन्तर्यामि ब्राह्मण सुबालोपनिषन्नारायणोपनिषदादिप्रसिद्ध सर्वान्तर्यामिताक नारायणपरताया एव युक्तत्वात् । " रुद्रो बहुशिरा बभ्रुः " इत्यादिषु भगवत्यपि रुद्रशब्दस्य प्रयोगदर्शनेन तस्य नारायणपरतायां बाधकाभावात् । " रुद्रो भूत्वा ग्नि रनूत्थायाध्वर्युंच यजमानंच हन्यात " इत्यादि ष्वग्न्यादि साधारण्येन प्रयुक्तस्य रुद्रशब्दस्य शिवासाधारण्यासम्भवेन तद्घटितैतद्वाक्यस्य नारायणैकान्त नारायणपदघटित " नारायण एवेदं सर्वमि " ति वाक्यापेक्षया दुर्बलत्वेन तेन तस्यान्यपरतानयनस्यासम्भवात् । " पुरुषो वै रुद्रः " इत्यस्यापि " सर्वो ह्येष रुद्र " इत्येत दुपपादनाय प्रवृत्तत्वात्, " सर्वगत्वा दनन्तस्य स एवाह मवस्थितः " इतिवत् " सर्वो ह्येष रुद्र " इत्येतदपि पुरुषात्मकत्वनिबन्धन सार्वात्म्यप्रतिपादनपर मित्यर्थस्यैव " पुरुषो वै रुद्र " इत्यनेन प्रतिपादनाच्च ।

यच्च – " वस्तुतस्तु " इत्यादिना सहस्रशीर्षत्वादे शिवासाधारण्यप्रतिपादनं, तदपि न, " सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् । विश्वं नारायणं देव मक्षरं प्रभुम् " " विश्वत श्चक्षु रुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् " " सहस्रबाहूदरवक्त्रनेत्रम् " " सर्वतः पाणिपादं त त्सर्वतोक्षि शिरोमुखम् " इत्यादि बहुश्रुतिस्मृतिवचनानुरोधेन सहस्रशीर्षत्वादे र्नारायणैकान्ततया तस्य शिवासाधारण्यासम्भवात् ।

यत्तु – " उतामृतत्वस्येशानः " इत्येतद्व्याख्यानप्रकरणे " नन्वीशानपदं न रूढ्या किञ्चिदुपस्थापयति, प्रतिसम्बन्ध्युपादान महिम्ना रूढिशक्त्युन्मेषस्य प्रतिबद्धत्वात् " इति पूर्वपक्ष मुपक्षिप्य " उच्यत " इत्यादिना योगार्थप्रतिसम्बन्ध्युपादानस्य रूढिशक्त्युन्मेष प्रतिबन्धकत्व नियमाभावं प्रतिज्ञाय, तादृशनियमाभाव स्थिरीकरणाय " प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच " इति महाभाष्यग्रन्थो पादानम् । तन्न ; – " शब्दपारायण " शब्दस्य कुत्रचि द्ग्रन्थविशेषे रूढताया एव कैय्यटादिभिरवगमेन तदर्थे 'शब्दाना' मिति षष्ठ्यन्तार्थान्वयस्यैव स्वरसतो लाभेन तावतोक्त नियमाभावस्या सिद्धेः । शब्दपारायणशब्दस्य योगरूढताया स्तदीय योगार्थे 'शब्दाना' मिति षष्ठ्यन्तार्थान्वयस्यच स्फुटतरप्रमाणान्तरेण सिद्धौ सत्यां तादृशमहाभाष्यानुरोधेनोक्तनियमासम्भवस्य वक्तुं शक्यत्वेपि तादृशप्रमाणाभावे तदसम्भवात् । पद्भि गौः, वत्सस्य धेनुः, इत्यादिप्रयोगवारणाय कल्पनीयायाः, ईशान शब्द व्याख्यानावसरे सप्रपंच मस्माभि र्निरूपितायाः– किंचिन्निष्ठप्रकारतानिरूपित विशेष्यतासम्बन्धेन शाब्दबुद्धिंप्रति पदवि.शिष्टा न्यविषयता सम्बन्धेनो पस्थितेः कारणत्वमिति व्युत्पत्ते र्विना नन्यथासिद्धप्रबलप्रमाणं वाङ्मात्रेण प्रतिक्षेपासम्भवात् । तादृशव्युत्पत्त्यनंगीकारे पद्भि गौरित्यादि प्रयोगापत्त्यादिदूषणानां पूर्वं मस्माभि र्निरूपितत्वाच्च।

एतेन - " शब्दपारायणमिति कस्यचि द्ग्रन्थस्य रूढं नाम " इति कैयटग्रन्थोदाहरण मप्यनुपयुक्तं वेदितव्यम् , उदाहृत कैयट ग्रन्थेन शब्दपारायण शब्दस्य केवलरूढ़ताया लाभेपि योगरूढ़ताया स्तदीययोगार्थे शब्दाना मिति षष्ठचन्तार्थान्वयस्य वा ऽलाभात् ।

किश्च - शब्दपारायणशब्दस्या त्र योगरूढ़त्वांगीकारेपि न युज्यते, तथासति पारायणशब्द योगार्थप्रतिसम्बन्धिन श्शब्दपारायणशब्द घटक शब्दशब्देनैवो पात्ततया तदर्थान्विते पारायणशब्दार्थे शब्दानामिति षष्ठचन्तार्थस्या न्वयासम्भवात् । तादृशान्वय बोधांगीकारे प्रजानां प्रजापतिः शच्या श्शचीपति रित्यादि प्रयोगाणामपि साधुतापत्तेः । नच शब्दपारायण शब्दघटक शब्दशब्देन पारायणशब्दार्थ प्रतिसम्बन्धिन श्शुद्धशब्दत्वेनैव प्रतिपादना त्तदन्वितेपि पारायणशब्दार्थे प्रतिपदोक्तत्वविशेषणविशिष्ट शब्दरूप प्रतिसम्बन्ध्यन्वये न दोषइति वाच्यम् , तथासति देवमष्यनुादि प्रजानां प्रजापतिः - हरिणेक्षणाया श्शच्या श्शचीपतिः - इत्यादिप्रयोगापत्ते र्दुर्वारत्वात् । तत्रापि देवमनुष्यादित्व हरिणेक्षणात्व रूपविशेषणांशाधिक्य सत्वात् ।

यच्च - उक्तनियमांगीकारे - " वेदानां वेदमिति च्छान्दोग्य वचनेन वेदयतीति व्युत्पत्त्या वेदनकरणे व्याकरणे रूढ़्या वेदतामपि साधय न्नागेशो व्याकुप्येत् " इति लेखनम् । तदप्यसंगतं, नागेशग्रन्थे " वेदानां वेदमिति च्छान्दोग्यश्रुति रप्येत दर्थपरैवेति द्रष्टव्यम् " इत्येव पङ्क्तिदर्शनेन तावता वेदशब्दस्य योगरूढ़ताया वा रूढ़्यर्थविशेषणीभूते योगार्थे वेदानामिति षष्ठचन्तार्थान्वयस्यवा ऽलाभेन तद्व्याकोपप्रसक्ते रभावात् । शंकररंगरामानुजादिभाष्यै रुक्तच्छान्दोग्यश्रुतिघटक वेदशब्दस्य केवलयौगिकतायाएवावगमेन तत्पक्षे वेदानामिति षष्ठचन्तार्थस्य योगार्थ एवान्वयेपि बाधकाभावात् । वेदशब्दस्य व्याकरणे रूढ़त्वांगीकारेपि रूढ़्यर्थएव षष्ठच-

न्तार्थान्वयसम्भवात् । सम्बन्धसामान्यार्थक वेदानामिति षष्ठचर्थस्य वेदशब्दरूढ़्यर्थे व्याकरणेन्वयेपि तस्य वेदनकरणत्वरूपसम्बन्धमादाय पर्यवसानसम्भवात । चतुर्दशसूत्र्याएवपरं वेदत्वं साधयतो नागेशस्यो क्तश्रुतिघटक वेदशब्दोपि चतुर्दशसूत्री पर एवे-त्यत्रैव संरम्भेणोक्तानेक प्रयोगवारणाय कल्पनीयाया व्युत्पत्ते रनेन बाधनासम्भवाच्च ।

अथ यत्तावत् - वेदाह मिति मन्त्रव्याख्याने रुद्रस्य महच्छब्द वाच्यतायां " अथ कस्मा दुच्यते महादेवः " इत्यादेः " तस्मा दुच्यते महादेवः " इत्यन्ताया अथर्वशिरश्श्रुतेः प्रमाणतयोपादानं; तन्मन्दम् , " अथ कस्मा दुच्यते महादेवः " इत्याद्यथर्वशिरश्श्रुते र्महादेव शब्दवाच्यता प्रतिपादनपरतायाः कथंचित्सम्भवेपि तस्या श्श्रुतेः केवल महच्छब्दवाच्यत्व प्रतिपादनैदम्पर्येण प्रवृत्तताया अनवगमेन रुद्रस्य महच्छब्दवाच्यतायां तस्याः प्रमाणत्वासम्भवात ।

एतेन " तस्मा दीशानो महादेवो महादेवः " इति महोपनिषत्प्रथमाध्यायवचनस्य प्रमाणतयोपादानमपि प्रत्युक्तं, तस्यापि केवल महच्छब्दवाच्यता प्रतिपादनपरताया अनवगमात ।

यच्च - ब्रह्मदत्तेषु भवादिष्वष्टसु नामसु 'महानि' तिनाम्नः परिगणनं स्वयं परिकल्प्य तस्य महच्छब्दस्य रुद्रनामतायां प्रमाणतयोपन्यसनं । तदपिन, शतपथे ऽष्टमूर्तिब्राह्मणे - "भूतानां पति स्संवत्सर उषसि रेतोसिंचत् , संवत्सरे कुमारो जायत, सोरोदीत्तं प्रजापतिं रब्रवीत् कुमार किं रोदिषि यच्छ्रमा त्तपसोधिजातोसीति, सोब्रवीत - अनपहतपाप्मावा अहं मनाहितनामा नाममेधेहि पाप्मनो पहत्या इति , तं प्रजापति रब्रवी द्रुद्रोसीति तदस्य तन्नामा करो दग्नि स्तद्रूप मभवत् , अग्नि र्वै रुद्रो यदरोदी त्तस्मा द्रुद्रः, सोब्रवीत ज्यायान्वा अह मस्मि धेह्येव मे नामेति तं प्रजापति रब्रवीत् -

भवोसीति शर्वोसीति ईशानोसीति, पशुपतिरसीति, उग्रोसीति, भीमोसीति, महादेवोसीति " इति मन्त्रे ब्रह्मदत्ततया परिगणितेषु रुद्रभवशर्वेशान पशुपत्युग्रभीम महादेवरूपे ष्वष्टसु नामसु महानि नाम्नोऽ पठनात्, महादेवनाम्नः परिगणनमात्रेण महानिति नाम्नः परिगणनवर्णनस्य मन्दजाल्पितत्वाच्च ।

एतेनान्यदपि प्रमाणजातं प्रत्युक्तं वेदितव्यम् ।

यदपि - " नन्विं " त्यादिना महादेवशब्दस्यैव कोशादिषु परिगणना न्महच्छब्दस्य कथं रुद्रबोधकत्व मित्याशंक्य प्रमाणबला न्महन्महादेवशब्दयो र्द्वयोरेव रुद्रे रूढ़त्वा न्महानिति शब्दोपि रुद्रं बोधयतीति समाधानकथनं । तदप्यसंगतम् - रुद्रे महच्छब्दरूढिग्राहकतया भिमतै रथर्वशिर श्श्रुत्यादिभिः पूर्वमेव तदसम्भवस्य वर्णितत्वेन तद्बला त्तत्र रूढ़चसिद्धौ कथितसमाधानस्या संगतत्वात ।

यदपिच - महन्महादेवशब्दयो र्द्वयोरेव रूढ़चंगीकारे पुरुष महापुरुषशब्दयो र्दृष्टान्ततया ग्रहणं । तदप्यसमञ्जसं, पुरुषमहापुरुष शब्दयो रुभयो र्नारायणवाचकताग्राहकप्रबलप्रमाण सद्भावेनो भयो र्नारायणे रूढ़िसिद्धावपि महच्छब्दस्य रुद्रे रूढ़ताग्राहक प्रमाणाभावेन पुरुष-महापुरुषशब्द दृष्टान्तेन महन्महादेवशब्दयो स्तत्सिद्धयसम्भवात ।

" पूर्वमेवाह मिहासमिति तत्पुरुषस्य पुरुषत्वं " " सयः पूर्वो स्मा त्सर्वस्मा त्सर्वा न्पाप्मन औष त्तस्मा त्पुरुषः " " पुर माक्रम्य सकलं शेते यस्मा न्महाप्रभुः । तस्मा त्पुरुष इत्येवं प्रोच्यते तत्व चिन्तकैः " " पूर्णत्वा त्पुरुषो विष्णुः पुराणत्वाच्च शार्ङ्गिणः । पुराण भजनाच्चापि विष्णुः पुरुष ईर्यते " इत्यादिबहुश्रुति स्मृतीतिहासादिवचनैः पुरुषशब्दस्य, " तस्यैकस्य महत्त्वंहि सचैकः पुरुषः स्मृतः । महापुरुषशब्दंस बिभर्त्येक स्सनातनः " " अथातो महादेवस्य महापुरुषस्यच " इत्यादि परःशतप्रमाण

बला न्महापुरुषशब्दस्यच नारायणे शक्तिसिद्धिव न्महच्छब्द महादेवशब्दयो रुद्रे शक्तिग्राहकविभिन्नप्रमाणाभावेन तदसिद्धेः ।

एतेन भीमसेनभीमशब्दयो र्दृष्टान्ततया ग्रहणमपि प्रत्युक्तम् । शक्तिग्राहकप्रमाणेषु भीमसेनभीमशब्दयो र्द्वयोरपि पृथक्पृथग्ग्रहण दर्शनेनात्र तद्दृष्टान्तेन महन्महादेवशब्दयो श्शक्तिग्राहकविभिन्नप्रमाणशून्ययो रुद्रे पृथक्पृथ कछक्ते रसिद्धेः । नहि भीमसेनशब्दशक्ति ग्राहकप्रमाणबलादेव भीमशब्दस्यापि शक्तिसिद्धिः । " भीमोम्लवेतसे घोरे शम्भौ मध्यमपाण्डवे । " इति मेदिन्यां, " कंकोऽजमीढो भीमस्तु मरुत्पुत्रो वृकोदरः " इति हेमचन्द्रेच, भीमशब्दस्यापि वृकोदरनामतया पठनेन पृथक्प्रमाणसम्भवात । नह्येवं रुद्रे महच्छब्दशक्ति ग्राहकं प्रमाणान्तर मस्ति, निर्वचननिघण्ट्वादीना मनुपलम्भात ।

यदपि - " नापि महान्तं पुरुषमिति व्यस्तयो र्महत्पुरुषशब्दयो श्श्रवणा द्धरिबोध स्सुलभ इति शंकनीयम् " इति पूर्वपक्षमुपक्षिप्य, " पंकजादिपदाना " मित्यादिना महापुरुषशब्दस्य समस्तस्यैव भगवति रूढ़तया तादृशानुपूर्व्या अत्राश्रवणेन व्यस्तयो र्महत्पुरुष शब्दयो श्श्रवणेपि हरिबोधासम्भवस्य वर्णनम् । तदप्यसंगतं - महत्पुरुषशब्दयो व्यस्तयो र्नारायण एकशक्त्यनंगीकारेपि तादृश पदद्वय स्मारित महापुरुषशब्देनैव नारायणबोधसम्भवात् । द्विरेफादि शब्दानां भ्रमरादिशब्द स्मारणद्वारा भ्रमरबोधकतायां इव " पत्युः प्रजाना मैश्वर्य पशूनां वा नकामये " " प्रजानां पतयो दृष्टाः पशूनां बृहतामपि " इत्यादिस्थलेषु प्रजापतिपशुपत्यादि बोधानुरोधेन तत्र प्रजापतिपशुपतिबृहस्पत्यादिशब्दानां समस्तानामश्रवणेपि तादृशशब्दावयवभूत प्रजापत्यादिशब्दानां तत्र श्रुतानामेव समस्तप्रजापत्यादिशब्दस्मारणद्वारा प्रजापत्यादि बोधकत्वस्यांगीकार्यतया तद्वदेवात्रापि महत्पुरुषशब्दयो र्महापुरुषशब्दावयवभूतयो

स्समस्तशब्दस्मरणद्वारा नारायणबोधकत्वावश्यकत्वात् । “ पत्युः प्रजाना + पशूना ” मित्यादावपि व्यस्तयो रेव कथं चित् शक्तिस्वीकारसम्भवेचा त्रापि महत्पुरुषशब्दयो स्तथात्वस्य दुरपह्नवत्वात् । पूर्वोक्तानेकनिर्वचनाद्यनुरोधेन पुरुषशब्दस्य भगवति शक्ते र्निष्प्रत्यूहतया तावतैव नारायणबोधस्यात्र दुर्वारत्वात । महच्छब्दस्यापि “ गुणभृ न्निर्गुणोमहान् ” इति महाभारते सहस्रनामाध्याये भगवन्नामतया परिगणनात्, “ तस्यैकस्य महत्वंहि सचैकः पुरुषः स्मृतः । महापुरुषशब्दश्च बिभर्त्यैकस्सनातनः ” इति मोक्षधर्मवचने पुरुषमहापुरुषशब्दयोरिव महच्छब्दस्यापि भगवदसाधारण्यप्रतिपादनाच्च, महच्छब्दस्यापि भगवति नारायणे शक्ततया व्यस्ताभ्यां महच्छब्द पुरुषशब्दाभ्यामपि विभिन्नया शक्त्या भगवत एव बोधनेनात्र हरिबोधासम्भववर्णनस्य सर्वथापहास्यत्वाच्च ।

अथ यत्तावत् – “ अथैवं सति यत् श्रीयामुनस्तोत्रभाष्ये ‘कः पुण्डरीक नयनः पुरुषोत्तमः क ’ इति श्लोकं व्याचक्षाणस्य श्रीवेंकटनाथकवेः अस्य सूक्तस्य नारायण परत्व व्यवस्थापनाय हेत्वष्टकनिरूपण श्रमस्य कागतिरितिचेत् ? किं ब्रूमः, न्यायोपहताः खलुहेतवः ” इत्यादिना पुरुषसूक्तस्य भगवत्परतायां हेत्वष्टकमुपन्यस्य तन्निराकरणम्, तद्विचार्यते ।

तत्र – पुरुषसूक्तस्य भगवत्परत्व व्यवस्थापनाय श्रीवेदान्ताचार्यै र्हेत्वष्टकं निरूपितमिति वर्णनं तावत्सुतरामसंगतं, एतदुपन्यस्तानामष्टानां हेतूनां स्तोत्रभाष्ये वर्णनादर्शनात् । “ पुरुषस्य हरे स्सूक्तम् ” इतिस्मरणम्, “इदं पुरुषसूक्तंहि” इत्यादिना मोक्षधर्मे पुरुषसूक्तस्य परमपुरुषविषयतया योजनम्, व्याससमृतावस्य भगवदर्चने विनियोगः, भगवच्छास्त्रादिषु तथाविनियोगः, भगवद्दैवत्यशान्तौ विनियोगः, इत्यादयएवहि हेतव स्तत्र सूक्तस्य भगवत्परतायां साधकतयोपन्यस्ताः । एवं स्थिते तदनुपन्यस्तानामपि हेतूनां

तदुपन्यस्तत्वेन वर्णनं किमभिप्रायकमिति न वयंजानीमः । आस्तामिदं । तद्धेतुखण्डनं तावत् विचारयामः ।

तत्र - यत्तावत् प्रथमहेतुनिराकरण प्रकरणे “ यद्यपि पौराणिकानि निर्वचनानी ” त्यादिना “ आपोवा ” इत्यादे रर्थवादस्य यथा “ पृष्ठै रुपतिष्ठत ” इत्यादौ पृष्ठशब्दस्य रथन्तरे लाक्षणिक प्रयोगनिमित्तज्ञापनेन चारितार्थ्यं, नतुरथन्तरे शक्तिग्राहकत्वम्, तथा “ पूस्संज्ञेतु शरीरेस्मिन् ” “ सएव वासुदेवोयम् ” इत्यादि पौराणिक निर्वचनानामपि क्वचिन्नारायणेपि पुरुषशब्दस्य लाक्षणिकप्रयोगसत्त्वात्तन्निमित्तज्ञापनेनैव चारितार्थ्यमिति वर्णनम् । तन्न, “ आपोवाऋत्वियमाच्छन् ” इत्याद्यर्थवादानां निर्वचनरूपत्वाभावेन रथन्तरादिषु पृष्ठशब्दशक्तिग्राहकत्वाभावेपि “ तत्पुरुषस्य पुरुषत्वम् ” इत्यादि श्रौतनिर्वचनानुरोधिनां पौराणिक निर्वचनानांशक्तिग्राहकत्वमन्तरा नैरर्थक्यापरिहारेण तद्ग्राहकताया आवश्यकत्वात् । निरूपितश्चायमर्थः पूर्वमेव सुस्पष्टम् ।

यच्च तत्रैव रुद्रे पुरुषशब्दशक्तेः श्रौतव्यवहारसिद्धतां हरौ तु पौराणिकव्यवहारमात्रसिद्धतां चाभिमन्यमानेन तयो र्मध्ये श्रौतव्यवहारसिद्ध रुद्रविषयकशक्तेरेव ग्राह्यत्वाभिधानम् । तदपि न, पूर्वोदाहृतारुण केतुकादिगत श्रौतनिर्वचनव्यवहाराणां नारायणे पुरुष शब्दशक्ति ग्राहयतां बहूनां जागरूकतया “ पुरुषो वै रुद्रः ” इत्यादे रुद्रे शक्तिग्राहकत्वासम्भवस्य पूर्वं वर्णिततयाच नारायण विषयकशक्ते रेव ग्राह्यत्वसिद्धेः ।

एतेन – पुरुषशब्दस्य रुद्रपरत्वे सहस्राक्षादिपदसमवधानेशानपदसंवळनादीना मनूकूलतावर्णनमपि परास्तम् । सहस्राक्षशब्दस्य शचीपताविव मुख्यप्रयोगात्, क्वचि त्प्रशंसादिपरवाक्ये योगार्थैकदेश मादाय रुद्रेपि प्रयोगस्य ब्रह्मभगवच्छब्दादीनां भगवदन्यत्र गुणलेशयोगमूलकौपचारिकप्रयोगव दुपपत्तेः, तावता सहस्राक्षशब्दस्य रुद्रे शक्त्यसिद्धे स्तत्समवधानस्या किंचित्करत्वात् । अत्रत्येशान

पदस्य केवलयोगार्थमात्रपरतायाः पूर्वमेव सप्रपंचं निरूपितत्वेन
तदानुकूल्यस्या प्यप्रयोजकत्वाच्च ।

यच्च द्वितीयहेतुनिराकरणप्रकरणे - महापुरुषशब्दस्य भगवति
नारायणे रूढत्वेपि समस्तस्यैव तथात्वेन व्यस्तयो र्महत्पुरुषशब्द-
यो र्भगवति रूढ्यभावा दत्रच व्यस्तयोरेव महत्पुरुषशब्दयो श्श्रवणा
त्तद्बला त्सूक्तस्य भगवत्परत्वं नसम्भव तीति वर्णनम् । तदपिन, व्य-
स्तयो र्महत्पुरुषशब्दयोरपि भगवति पृथगेव रूढतायाः पूर्वमेव
निरूपिततया तद्बलादपि सूक्तस्य भगवत्परताया दुर्वारत्वात् ।
महापुरुषशब्दस्मारण द्वारा व्यस्तयोरपि भगवद्बोधकतासम्भवस्य
पूर्वं निरूपितत्वाच्च ।

यच्च तत्रैव महच्छब्दस्य रुद्रे पृथग्रूढिसद्भाववर्णनम् । तदपि
तद्ग्राहकप्रमाणाभावात् , तद्ग्राहकतयोदाहृताना मन्यपरत्वाच्च पूर्वमेव
निरस्तम् ।

यदपि तत्रैव पुरुषशब्दस्य हिरण्यगर्भादिसाधारण्यवर्णनम् ।
तदपि भगवति पुरुषशब्दरूढे र्बहुप्रमाणोपन्यासपूर्वकं स्थापि-
तत्वात् , तत्रैव पुरुषशब्दस्य मुख्यताया स्तदन्यत्र तत्प्रयो-
गस्य " ते सर्वे पुरुषांशत्वा दुच्यन्ते पुरुषा इति " इत्या
दि पाद्मादि वचनैः पुरुषांशत्व निबन्धनताया स्सप्रपंचं निरू-
पितत्वात् , स्वयमनेनैवात्रत्य पुरुषशब्दस्य वाधूल--
वचनाद्यनुरोधेन पूर्णवस्तुप्रतिपादकताया अंगीकृततया ऽ न्यसाधा
रण्या सम्भवात् , उत्तरत्रानेनैव पुरुषसूक्तस्य रुद्रपरत्व साधकहेतू
पन्यासावसरे पुरुषब्दस्य श्रुतित्वेन परिगणनेन स्ववचनविरोधपरा
हतत्वाच्च निरस्तम् ।

यच्च तृतीयहेतुदूषणावसरे समनन्तरानुवाके लक्ष्मीपतित्वश्रवण
स्य पुरुषसूक्तस्य भगवत्परत्वसाधने ऽन्यथासिद्धत्ववर्णनम् । तदपिन,

वक्ष्यमाणरीत्या " अद्भ्यस्सम्भूत " इत्यादिसमनन्तरानुवाकगते
" ह्रीश्चते लक्ष्मीश्च पत्न्यौ " इति वाक्ये ह्रीलक्ष्मीशब्दयो र्भूदेवी-
श्रीदेवीपरत्वेना न्यपरत्वासम्भवेन श्री भूमिपतित्वस्य भगवदसाधा
रणलिंगत्वेन तस्य पुरुषसूक्त भगवत्परताया मनन्यथा सिद्धत्वात ।
तथाहि - " ह्रीश्चते लक्ष्मीश्चपत्न्यौ " इत्यत्र ह्रीशब्दस्ताव द्भूदेवीपरः,
लक्ष्मीशब्देन कमलाया उपादानेन पारिशेष्यात् लक्ष्म्या सहैकपत्य
न्वयलिंगात् । श्रीरामायणे " रामस्य दक्षिणे पार्श्वे पद्माश्री स्समव
स्थिता । सव्येतु ह्रीर्विशालाक्षी व्यवसाय स्तथाग्रतः ॥ " इति श्लोके
भूदेव्यां ह्रीशब्दप्रयोगाच्च । तत्रहि · परिशेषात्सव्यपार्श्वान्वयलिंगेनच्च
भूदेव्याएव ह्रीशब्दार्थत्व मवश्यांगीकार्यम् । अतएवहि पाद्मे - तथै-
व धरणीदेवी दक्षिणेतरगा तथा " इति ह्रीशब्दस्थाने धरणीश-
ब्दप्रयोगो प्युपपद्यते । एवं " श्रीश्चते लक्ष्मीश्चपत्न्यौ " इति समान
प्रकरणे वाजसनेयके ह्रीशब्दस्थाने श्रीशब्दोपादानादपि ह्रीशब्दस्य
भूदेवीपरत्वं सिद्ध्यति । तत्र हि लक्ष्मीशब्देन पौनरुक्त्यपरिहारा यै-
कपत्यन्वय लिंगेन " गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां त्वा मिहोपह्वयेश्रियम् " इति मन्त्रे भूदेव्यां दृष्ट-
प्रयोगस्य श्रीशब्दस्य भूदेवीपरत्वं सिद्धम् । लक्ष्मीशब्दश्च कमलायां
रूढः , प्रचुरप्रयोगात् , " लक्ष्मीः पद्मालया पद्मेति कोशाच्च ।
नचेशान श्रुत्यनुराधात् ह्रीशब्दस्य गौरीपरत्वमस्त्विवातिवाच्यम् ,
अत्रत्येशानशब्दस्य केवल यौगिकतायाः पूर्वमेव निरूपितत्वेन रुद्रप-
रत्वाभावेने शानश्रुत्यभावात्तदनुरोधेन गौरीपरत्वासिद्धेः । " विष्णु
पत्नीं महीं देवीं माधवीं माधवप्रियाम् । लक्ष्मीप्रियसखीं देवीं न-
माम्यच्युतवल्लभाम् ॥ " इति श्रुतिसिद्ध लक्ष्मीसाहचर्य लिंगेन-
तयासहैकपत्यन्वयलिंगेनच लक्ष्मीशब्द समभिव्याहृत ह्रीशब्दस्य
भूदेवीपरताया एव युक्तत्वाच्च । नच " ह्रीश्चत " इति हल्लेखायाः
प्रथमं श्रुतत्वा त्तस्याश्च गौरीवाचकतया प्रथमश्रुतह्रीशब्दानुरोधेन ल-

क्ष्मीशब्दस्यैव " तस्यांकमण्डलारूढ़ा शक्तिर्माहेश्वरीवरा । महाल-
क्ष्मीरिति ख्याता श्यामा सर्वमनोहरा " इति वायुसंहितोक्तमाहेश्व-
रशक्तिरूप माहेश्वरशक्त्यंशलीलापरत्व मस्त्विति वाच्यम् । ह्ल्ले-
खाया गौरीवाच्चितायां प्रमाणाभावेन समानप्रकरणे वाजसनेयके-
ह्रीशब्दस्थाने श्रीशब्दप्रयोगेन च प्रथमश्रुत ह्रीशब्दानुरोधेन ल-
क्ष्मीशब्दस्य कमलायांरूढ्या न्यपरत्व कल्पनासम्भवात । ह्ल्ले-
खायाः कथंचि द्गौरीपरत्वसम्भवेपि अनुस्वाराद्यन्त ह्रीशब्दस्यैव
ह्ल्लेखारूपत्वेना त्रत्य विसर्गान्त ह्रीशब्दस्य गौरीपरत्वासम्भवाच्च ।
अधिकमस्मदीये उत्तरानुवाकभाष्ये ऽनुसन्धेयम् ।

यच्च - नारायणसमाख्ययास्य सूक्तस्य कल्पसूत्रादिषु व्यवहार
रूप चतुर्थ हेतुखण्डनावसरे - " नारायणाख्येन केनचिदृषिणा-
दृष्टत्वात् " इति माधवीयोपष्टंभेन नारायणसमाख्याया नारायण
दृष्टत्व निबन्धनता वर्णनम् । तच्च सप्रपञ्चं नारायणस्यैव तत्सूक्तदेव
तात्व निरूपणेन, " दृष्टं साम " इत्यस्य साम मात्रविषयतया
ऽस्य देवतार्थकतद्धितान्ततया एवाश्रयणीयतयाचपूर्वमेव निरस्तम् ।

यदपि तत्रैव पुरुषशब्दवाच्यस्य पुरुषसूक्त देवतात्वप्रति-
पादकानां वाक्यानां नारायणस्य तद्देवतात्वे प्रतिबन्धकत्ववर्णनम् ।
तदपिन, पुरुषपदवाच्यस्यैव सूक्तदेवतात्वेपि पुरुषनारायणयो रभि-
न्नतायाः पूर्वमेवा स्माभि र्निरूपिततया तेषां वाक्यानां नारायणस्य
सूक्तदेवतात्वे प्रतिबन्धकत्वासम्भवात । एकस्यैव देवतात्वद्रष्टृत्वयो
श्श्रीसूक्तादौ दर्शनेनात्रापि तथात्वे बाधकाभावात् ।

यदपि विष्णुदेवताकशान्तिविनियोग भगवदर्चनादिविनियोग
रूप पंचमषष्ठहेत्वो र्निराकरणप्रकरणे - रुद्रधनदाद्याराधने प्यस्य
सूक्तस्य विनियुक्ततया भगवदाराधनादिषु विनियोगस्य तन्न्यायेन
तद्देवताकत्वाभावे प्युपपत्त्या भगवत्परताया मसाधकत्ववर्णनम् ।

तदपिन, आथर्वणेष्टादशमहाशान्तिप्रकरणे तत्तद्दैवत्यशान्तौ तत्तद्देवताक
मन्त्रविनियोगावसरे ऽस्य सूक्तस्य " वैष्णव्यां पुरुषसूक्तम् " इति
विष्णुदेवताकशान्तौ विनियोगदर्शनेन विष्णुदेवताकत्वावश्यंभावात ।
अन्यथा ऽन्यदेवताकशान्तिषु परं तत्तद्देवताकमन्त्रविनियोगः - विष्णु
देवताकशान्तौ तु नतथेति वैरूप्यापत्त्या सन्दर्भविरोधात । एकस्यैव
मन्त्रस्य नानाकर्मसु विनियोगेपि क्वचिदेकत्रैव तस्य मुख्यताया
अन्यत्र गौणताया श्चैन्द्रीन्यायसम्प्रतिपन्नतया पूर्वोदाहृतविनियोगा-
नुसारेण पुरुषश्रुतिसहस्रशीर्षत्वादि लिंगाद्यनुगुणस्य भगवद्दैवत्य-
कर्मणि सूक्तविनियोगस्य मुख्यत्वावसाये ऽन्यत्र गौणताया स्सुनिश्च
यत्वेन मुख्यविनियोगस्य भगवत्परता साधकत्वसम्भवात् । मन्त्र-
स्तुत्यस्यै तद्देवतात्वमिति पूर्वमेव सप्रपंचं निरूपिततया छन्दोग-
सामविधानब्राह्मणे " एषा वैष्णवीनाम संहितैतां प्रयुंज न्विष्णुं
प्रीणाति " इत्यनेन पुरुषसूक्तजपस्य भगवत्प्रीणनहेतुता प्रतिपाद-
नात्, तत्प्रीणनस्य तत्स्तुतिमन्तरानुपपत्ते र्विष्णोरेव सूक्तस्तुत्यत्वा-
वश्यम्भावा त्तस्यैव तद्देवतात्वस्य निराबाधत्वाच्च ।

यदपि - सप्तमाष्टमयो र्हेत्वोः वैष्णव्यां संहितायां परिगणनं पु-
राणेषु सूक्तोक्तप्रक्रियया स्तुतिरित्येतयो र्निराकरणप्रकरणे - शन्य
समवेतार्थप्रतिपादकेन " शन्नो देवी " रिति मन्त्रेण शनेरिव, बुधास-
मवेतार्थप्रतिपादकेन " उद्बुध्यस्व " इति मन्त्रेण बुधस्येवच पुरुष
सूक्तस्य भगवत्प्रकाशकत्वाभावेपि तेन तत्स्तुते स्सम्भवात्, पुराणेषु
पुरुषसूक्तोक्तप्रक्रियया रुद्रस्यापि स्तुतिदर्शनाच्च तयो र्हेत्वो रसा-
धकत्ववर्णनं । तदपिन, " शन्नो देवी " रित्यादे श्शन्यादिसमवेतार्थ
प्रकाशकत्वस्य बाधिततया ऽसम्भवेपि सूक्तप्रकाश्यानां सहस्रशीर्षत्वा-
दीनां नारायणे ऽबाधिततया सूक्तस्य भगवत्समवेतार्थप्रकाशकता
सम्भवात । क्वचिद्बाधितार्थकस्थले मन्त्राणां तत्स्तुत्यदेवता ऽसम
वेतार्थप्रकाशकत्वेपि तत्तद्देवतास्तुतौ विनियुक्तानां मन्त्राणां तत्तद्देवता

समवेतार्थप्रकाशकताया एवौत्सर्गिकतया भगवत्स्तुतिविनियुक्तस्या
स्य सूक्तस्य यावद्बाधितार्थकत्वदर्शनं तत्प्रतिपादकताया अनपवादेन
तत्स्तुता वेतत्सूक्तविनियोगस्य सूक्तस्य तत्परता साधकतासम्भवात ।
क्वचित्तामसपुराणे रुद्रस्तुताव प्यस्य सूक्तस्य विनियुक्तत्वांगीकारे
पि प्रबलसमसात्विकानेक पुराणविरुद्धतया पुरुषश्रुत्यादिविरुद्धतयाच्च
अनपहतपाप्मनि रुद्रे बाधिताना मनेकेषा मर्थानां प्रतिपादकस्यास्य
सूक्तस्य रुद्रस्तुतौ मुख्यविनियुक्तत्वासम्भवेना दोषाच्च ।

अथ पुरुषसूक्तस्य शिवपरतायां परै स्साधकतयोक्ता हेतवो
विचार्यन्ते ।

तत्र - यत्तावदुक्तम् पुरुषशब्द श्रुति स्सहस्राक्षशब्द श्रुति
रीशानशब्दश्रुति र्महदभिख्या श्रुतिश्चेति श्रुतिचतुष्टयमिति ।
तत्र, पुरुषशब्दस्य रुद्रे शक्तिग्राहक प्रमाणाभावस्य विष्णावेव-
रूढतायाश्च पूर्वं निरूपितत्वेन पुरुषशब्दश्रुते श्शिवपरत्वासाधकत्वात ।
सहस्राक्षशब्दस्य शचीपताविव रूढताया विष्णावपि प्रचुरप्रयोगा-
देश्च पूर्वं निरूपितत्वेन तस्य शिवासाधारणत्वाभावेन तच्छ्रुतेरपि
शिवपरत्वासाधकत्वात् । अत्रत्येशानशब्दस्य केवलयौगिकताया
स्तद्व्याख्यानावसरएव स्पष्टं निरूपिततया तस्य श्रुतित्वाभावात ।
शक्तिग्राहकप्रमाणाभावेन शक्तिग्राहकतयाभिमताना मन्यपरताया
निरूपितत्वेनच रुद्रे महच्छब्दशक्तेरसिद्ध्या तदभिख्यात्वस्याभावे-
नच तच्छ्रुतेरपि शिवपरत्वासाधकत्वाच्च । प्रत्युतो दाहृतश्रुतीनां
भगवत्परत्वसाधकताया एव पूर्वं निरूपितत्वाच्च ।

यदप्युक्तम् - सहस्रशीर्षत्व लिंगं , व्योमकेशत्वलिंगम् , आदि-
त्यवर्णत्वलिंगम् , पुरस्ताद्धातुदाहृतत्वलिंगम् , विद्वदिन्द्रज्ञानविषयत्वं
लिंगम् , हृल्लेखाख्य ह्रीपतित्वलिगम् , अहोरात्रात्मक पार्श्वद्वयपरि
मण्डितार्धनारीश्वराख्य कृष्णपिंगळत्वलिंगं , अश्विन्यादि नक्षत्र-

मालारूपत्वलिंगम् , चेति लिंगाष्टकमिति । तदपिन, सहस्रशीर्ष-
त्वस्य भगवदसाधारणतायाः पूर्वं निरूपितत्वात् , तदसाधारण्या
भावेपि तत्साधारण्येन शिवासाधारण्याभावाच्च, तस्य शिवपरत्वा-
साधकत्वात । " शीर्ष्णोद्यौ स्समवर्तत " इत्यत्र उत्तमांगवाचिशी-
र्षशब्दार्था द्व्योम्न उत्पन्नत्वलाभेपि व्योमकेशत्वस्य ततोऽलाभेन
तल्लिंगस्य सूक्ते ऽभावेन तद्बलेन सूक्तस्य शिवपरत्वासम्भवात् ।
आदित्यवर्णत्वस्य " दिविसूर्यसहस्रस्ये " त्यादिवचनोपन्यास पूर्वकं
भगवदसाधारण्यस्य पूर्वं निरूपितत्वेन तदसाधारण्याभावेपि तत्सा-
धारणस्य शिवासाधारण्याभावेनच तस्य शिवपरत्वसाधकत्वासम्भ-
वात् । पुरस्ताद्धातुदाहृतत्वस्य सद्वारकसृष्टिपूर्वकालावच्छेदेन
जगत्सृष्ट्यनभिज्ञ चतुर्मुख स्तुतत्वरूपस्य चतुर्मुखसृष्टे रुद्रे ऽसम्भवेन
तस्य भगवदसाधारण्यस्य पूर्वं वर्णितत्वेनच शिवासाधारणलिंगत्वाभावेन
शिवपरत्वसाधकत्वासम्भवात् । "धातापुरस्ताद्यमुदाजहार । शक्रःप्रवि-
द्वान् " इति धातुदाहृतत्व शक्रोदाहृतत्वयो रेकविषयतालाभेन श-
क्रोदाहृतत्वस्यापि भगवत्परत्वावसायेन तस्यापि शिवपरत्वसाधक-
त्वासम्भवात । " ह्रीश्चते लक्ष्मीश्च पत्न्यौ " इत्यत्र श्रीभूमिपतित्व-
लाभस्य पूर्वमेव संग्रहेण निरूपिततया उत्तरनारायणभाष्ये सप्रपंच
मस्माभिः निरूपयिष्यमाणतयाच ह्रीपतित्वरूपलिंगस्य तत्राभावात् ।
" अहो रात्रे पार्श्वे " इत्यस्या प्यन्यथैवार्थस्य तद्भाष्ये ऽस्माभि निरू-
पिततया, नक्षत्ररूपवत्त्वस्य भगवदसाधारणतायाः स्पष्टं निरूपिततया
च तयोर प्यसाधकत्वाच्च ।

यदपि च - भगवन्नारायणज्ञानविषयत्व मधिकं लिंगमित्युक्तम् ।
तदपि न, सर्वज्ञभगवन्नारायण ज्ञानविषयताया स्सामान्यत स्सर्वसाधा
रणतया, भगवत्सृष्टत्वेन भगवल्लब्धवरत्वेना नपहतपाप्मत्वेनच सा
त्विकबहुप्रमाण प्रतिपन्नस्य शिवस्या न्यादृश भगवज्ज्ञानविषयताया
असम्भवेन च तस्य लिंगत्वासम्भवात ।

यच्चोक्तम् - कैवल्य श्वेताश्वतरमन्त्र तदर्थ प्रत्यभिज्ञानद्वय-मिति। तदपि न, पूर्वोक्तरीत्या श्रुत्यादिभि भगवत्परत्वेन व्याख्यात-स्य तथा बहुसात्विकवचनै रुपबृंहितस्य पुरुषश्रुत्यादि दृढीकृत भगवत्परताकस्य सूक्तस्या न्यथा सिद्धेन प्रत्यभिज्ञानेन शिवपरत्वा सम्भवात् । कैवल्यादि मन्त्राणामपि भगवत्परताया अन्यत्र निरूपितत्वाच्च।

यदपि चोक्तम् - परमेश्वरपूजायां विनियोग इति साधकम् । तदपि - पूर्वोक्तप्रमाणगणेन सिद्धभगवत्परताकस्य विनियोगमात्रेण शिवपरत्वासम्भवात् , विनियोगस्या न्यथापि सम्भवस्य ग्रन्थकृतै वांगीकृतत्वात् , भगवत्पूजायां विनियोगस्य भगवत्परतां विनापि-सम्भवं वर्णयता मन्त्रान्यथा वक्तु मशक्यत्वा च्च न शिवपरत्वसाधकम् ।

यच्च प्रकृत मुक्त दृष्टप्रक्रियया पुराणेषु परमेश्वरस्तव इति-हेत्वन्तरम् । तच्च शन्यादीनां शन्नोदेवी रित्यादिभि रिवेति स्वोक्त्यैव पराहृतमिति न शिवपरत्व साधकमिति । अधिकमन्यत्र ।

तदेव मतिपतित सकलेतरदेवतापरत्व सम्भावना गन्धं तत्व-निर्णयैकपरमिदं पौरुषं सूक्तमि त्येतदैकार्थ्येन सर्वेपि वेदा श्श्रियःपति मखिलहेयप्रत्यनीक कल्याणैकतानं निखिलजग दुदयविभवलयलीलं परमकारुणिकं भगवन्तं नारायणमेव परं तत्वं प्रतिपादयन्तीति सर्व मनवद्यन् ।

श्रीम द्वादिभयंकर वंश्य श्श्रीकृष्णसूरि तनुजन्मा ।
श्रीमा ननन्तसूरि र्व्यतनो त्पुंसूक्तभाष्य मधिकाञ्चि ॥

श्रीकाञ्ची प्रतिवादिभयंकरं अनन्ताचार्यविरचितं

॥ पुरुषसूक्तभाष्यं समाप्तम् ॥



